No. १३८०

Title भवानन्दी प्रकाशे सामान्य-लक्षण पूर्वपक्ष प्रकाशः

Author महादेव पण्डितः

Extent ३६ Age *

Subject न्याय वैशेषिकं

भवानन्दीप्रकाशे सामान्यलक्षण
पूर्वपक्षप्रकाशः

पत्रे ३८

१३८०

पत्र
८२

भवा०टी०
१

श्रीमन्महागणपतये नमः॥ श्रीगुरुचरणेभ्यो नमः॥ ॥ अनुमाननिरूपणग्रंथके
सामान्यलक्षणायां इंद्रियसंनिकर्षत्वव्यवस्थापने ऽर्थान्तरत्वमाशंक्याह दीधितौ
प्रसंगादिति। आख्यायां कार्येण व्याप्तिग्रहे लेति व्याप्तिग्रहात्मककार्यज्ञानेनेत्यर्थः
स्मृतावाह इति सामान्यप्रत्यासत्त्यासर्वोपसंहारादिति व्याप्तिग्रहोपायपद्येनानु
भूतायाः संस्कारसत्त्वादिति भावः दीधितौ व्यवस्थापयितुं। इंद्रियसंनिकर्षत्वेन
व्यवस्थापयितुं। अत्रोच्यत इत्यादिनाग्रे व्यवस्थापने नेहानीमव्यवस्थापनाद्व्यव
स्थापयतीति नोक्तं। न च मूले सकलत्वधूमादिविषयक इत्यनेन सर्वधूमविषयकत्व
मेव तत्र प्रमाणमुक्तमेवं कथमन्यथेत्यादिनानुपपत्तिरप्युक्तैवेति वाच्यं। तस्यत ॐ शिवः
द्पर इत्यादिनान्यतरेणाव्यवस्थापकत्वात्। समानाधिकरणयोरेवेति निरू १
पकताश्रयतान्यतरसंबंधेनेति शेषः। तेन न द्विवचनानुपपत्तिः आख्यायां अने
यासधिकरणयोरपि व्याप्तिरिति पक्षेऽप्युपोद्घातोऽपीति विशिष्टपरामर्शस्यास
भवेन लक्षणसंभव इति प्रकृतानुकूलत्वरूपोद्घातः संभवतीत्याशयः। वह्निपरा

मर्शत्वावच्छिन्नप्रकारतानाघटिततल्लक्षणाभिप्रायेणेह महानसीयवन्हीति। वन्ह्यनुमितिं वा प्रा
येति। वाकारो नास्थायां। तथाऽसंत्तु समानाधिकरणयोरेव व्याप्तिरिति पक्षे पर्वतो वन्हि
मानित्यनिश्चितसाध्यकानुमितौ व्यभिचारेण वन्हिपरामर्शत्वेन हेतुत्वस्यासंभवेन
दृश्यमानव्याप्यवच्छेदकताकधर्मप्रकारकपक्षधर्मताज्ञानत्वेनैवागत्या हेतुत्वेन
वन्हिपरामर्शत्वेन हेतुताघटिततल्लक्षणकरणं न संभवतीति। उभयत्रैवेति। कल्पभे
देनेति शेषः। दीधितावत्रैवेति। सामान्यलक्षणप्रत्यासत्तिशब्दे चेत्यर्थः। इंद्रियसंबद्ध
विशेषणतेत्याद्यकल्पाभिप्रायेणेह सामान्यं लक्षणमिति। यस्याइत्यर्थे इति अत्र सा
मान्यं च तत् लक्षणं चेति कर्मधारयलक्षणशंकस्याः जहल्लिंगत्वं तदर्थस्याविशे
षणतया च सामान्यलक्षणं प्रत्यासत्तिरिति स्यात्तु सामान्यलक्षणजन्यासन्नि
रित्यतस्तत्परित्यागः। अतिरिक्तैवेति द्वितीयकल्पाभिप्रायेणेह सामान्यं लक्ष
णं निरूपकमिति तज्ज्ञानमिति सामान्यज्ञानमित्यर्थः। तत्र तयोर्मध्ये संबद्धं। सन्निक

भवा·टी०
२

र्थोऽश्रयं।तद्विशेष्यकज्ञानप्रकारइतितद्विशेष्यकत्वावच्छिन्नज्ञानप्रकारताश्रयइत्यर्थः।त
द्विशेष्यतानिरूपितज्ञानप्रकारताशालीतियावत्।तेनेन्द्रियसंबद्धघटादिविशेष्यका
घटांशेघटत्वादिप्रकारकादृष्टकालीनः घटइत्यादिनाज्ञानान्तरयावद्घटादिप्रत्यक्षा
वृत्तिः।ननुभावप्रत्ययार्थविवक्षणेनेन्द्रियसंबद्धविशेषणवृत्तिधर्मस्यैवतादृशवि
शेषणताशकार्यत्वलाभेनेन्द्रियसंबद्धविशेष्यकज्ञानप्रकारत्वस्यैवप्रत्यास
त्तित्वंपर्यवस्यतीतिननुसामान्यस्यैत्यतआह विशेषणंतेस्यत्रेति।नविवक्षितइति
तथाचविशेषणंतेस्यत्रस्वार्थेतल्प्रत्ययइतिभावः।व्याख्यायांविवक्षितत्वेति।दे
वतेत्यादावेवस्वार्थेतल्प्रत्ययस्यानुशासनादितिभावः।इन्द्रियसंबद्धे।धूमादौ।न
नुधूमत्वादिनिष्ठविशेषणतायाधूमाद्यवृत्तितयाधारसप्तम्यसंगतेरत आह सप्त
म्यर्थेश्चेति।तथाचवैषयिकाधारसप्तमीतिभावः।उक्तरीत्याधूलीपटलेधूमत्वस्या
विशेषणत्वादाह विशेषणत्वमितिप्रकारत्वमितितथाचेन्द्रियसंबद्धविशेष्यतानिरू

राम
२

यित्तज्ञानप्रकारताशालीतिपर्यवसितार्थः। तेनधूमत्वादिनिष्ठप्रकारतायाधूमादावव
छेदकत्वानंगीकारेपिनक्षतिः आधिकरण्येतिव्यधिकरणबहुव्रीहेरप्रामाणिकत्वा
दितिनियतप्रयोगविषयत्वादितिभावः केचित्तु बहुव्रीहिसमासेज्ञानप्रकारतावच्छि
न्नस्याज्ञाभावादिंद्रियसंबंधविशेष्यकानुद्बुद्धसंस्कारादिप्रकारीभूतस्यापिधूमत्वा
देः प्रमासन्निकर्षापत्तिरतआहसंबद्धपदस्येववेतीत्याहुः। तत्संबद्धेत्यादितितस्याद
मिंद्रियपदंज्ञानपरं चवक्ष्यमाणेत्यादिंद्रियजन्यज्ञानपरं। तथाचस्वसंनि
कृष्टविशेष्यकस्वजन्यज्ञानप्रकारत्वमत्रपरंपरतासंबंधइतिभावः संबद्धपद
स्यतादृशप्रकारार्थत्वेउक्तबहुव्रीह्यसंगतिरितिकर्मधारयपरतयाव्याचष्टेसं
बंधेतोत्पन्नचेतिसैवविशेषणत्वेतिसैवविशेषणतापरप्रतिपाद्येत्यर्थः। ननुत
स्याविशेषणतापदप्रतिपाद्यत्वकथमंनिर्वीजमतआहव्याख्यायांतांत्रिकेरिति

भवानं·टी
३
3

तथैव विशेषणतापदप्रतिपाद्यत्वेनैव । पारिभाषितत्वादिति । तथा च तत्कथनं तां त्रिकालं
तादृशपरिभाषारहस्यकथनायेतिभावः । ननु तां त्रिकालं तादृशपरिभाषायाः किंप्रयोज
नं । न च सामान्यप्रत्यासत्तेरभावग्राहकविशेषणतांतर्गतत्वं न त्वतिरिक्तत्वमिति प्र
तिपादनमेवेति वाच्यं । संबंधमात्रस्य तादृशविशेषणतापदार्थत्वे प्रत्यासत्तेरेक
विधत्वापत्त्या कालिकविशेषणतादेरप्यभावादिग्राहकतापत्त्या चाभावादिग्राहका
भावादिनिरूपितविलक्षणविशेषणताया एव विशेषणतापदार्थत्वस्यावश्यवक्त
व्यतया तस्यास्तादृशविशेषणतांतर्गतत्वासंभवादिति चेन्न संयोगादिपंचसंनिकर्ष राम
भिन्नेंद्रियप्रत्यासत्तिमात्रस्यैव विशेषणतापदार्थत्वमन्यथा समवायादिग्राहकप्रत्या ३
सत्तेरप्यतिरिक्तत्वापत्तिरित्याशयात् । यत्तु इंद्रियप्रतियोगिकसंबंधविशेषस्यैवें
द्रियप्रत्यासत्तितया निरुक्तसामान्यस्य वक्ष्यमाणतज्ज्ञानस्य चेंद्रियप्रतियोगिक

संबंधविशेषस्यैवेंद्रियप्रत्यासत्तितया निरूढसामान्यस्य तु स्वप्रमाणतज्ज्ञानस्यैवें
द्रियप्रतियोगिकत्वाभावेनेंद्रियप्रत्यासत्तित्वं न संभवतीति। तदुक्तं इन्द्रियेतादृशप्रत्यास
त्त्यासंबंधित्वप्रत्ययबलेन तादृशप्रत्यासत्तेरिंद्रियप्रतियोगिकत्वांगीकारात्। विशिष्टप्र
त्यासत्तिघटकसंयोगादेरिंद्रियप्रतियोगिकत्वे न विरोधः स्येंद्रियप्रत्यासत्तित्वमिति तु न
सम्यक्। स्मरणादेरपींद्रियप्रत्यासत्तितया तद्घटकस्य कस्यापींद्रियप्रतियोगिकत्वासं
भवात्। न च तथापि सामान्यप्रत्यासत्तेरिंद्रियव्यापारत्वासंभवेन तज्जन्यज्ञाने कथमिंद्रि
यस्य कारणत्वमिति वाच्यं। तत्र यथासंभवं विषयेंद्रियसंयोगादेः आवरणनिरोधेन मनो
योगस्य व्यापारत्वावश्यकतये इंद्रियमनोयोगादेर्वा व्यापारत्वसंभवादित्यलं। ननु यदि
ज्ञानस्यात्र स्वैव सकलेंद्रियाणां सामान्यप्रत्यासत्तिनिर्वाहकत्वं तदा सामान्यप्रकारकयत्किं
चिज्ज्ञानसत्त्वे तत्सामान्यस्य सकलेंद्रियाणामेव सामान्यप्रत्यासत्तित्वं फलितमिति त
ज्जन्यज्ञाने चाक्षुषत्वादिसांकर्यापत्तिरत आह दीधितौ अत्र चेति व्यापारव्याप्यप्रकारत्वेनै

भवानी टी·
४

समन्वयथोर्घटकत्वं लौकिकसंबंधेनेंद्रियजन्यत्वे वान्वेति। सीधितो वह्निरिंद्रियस्येति
एतस्यापि लौकिकसंबंधेनेंद्रियजन्यत्वे वान्वयः लौकिकः संबंधः लौकिकसाक्षा
त्कारोपधायकः संबंधः तदिंद्रियजन्यत्वं चेति यदिंद्रियस्य प्रत्यासत्तिस्तदिंद्रियज
न्यतावच्छेदकजातिश्चाक्षुषत्वादिकमित्यर्थः नियामकं कारणतावच्छेदकघटकं। तथा
च समवायादिसंबंधावच्छिन्नधूमत्वादिप्रकारतानिरूपितलौकिकान्यधूमनिष्ठमुख्य
विशेष्यतासंबंधेन तत्कालीनतत्पुरुषीयचाक्षुषत्वाद्यवच्छिन्नं प्रति महदुद्भूतरूपसमा
नाधिकरणतत्कालीनतत्पुरुषीयचक्षुरादिसंयोगादिमद्धर्मिनिष्ठविशेष्यतानि
रूपिततत्कालीनतत्पुरुषीयचाक्षुषादिप्रकारतावद्धूमत्वत्वादिना समवायादिसं
बंधेन हेतुतेति फलितं। कालिकादिसंबंधेन धूमत्वादिसामान्यलक्षणजन्यप्रत्यक्षे
प्रमेयत्वादिसामान्यलक्षणजन्यप्रत्यक्षे धूमत्वादिप्रकारकप्राथमिकलौकि
कप्रत्यक्षे धूमत्वादिप्रकारकभ्रमे लौकिकसंनिकर्षं धूमन्योपनीतधूमादिप्रका

राम
४

रकधूमवह्न्यादिज्ञाने व्यभिचारवारणाय प्रकारतायां समवायादिसंबंधावच्छिन्नत्वस्य
विशेष्यतायां च निरूपितत्वात् तल्लौकिकान्यत्वधूमादिव्यक्तिनिष्ठत्वमुख्यत्वानां निवे
शः कालांतरीयपुरुषांतरीयचाक्षुषप्रमादायातिप्रसंगवारणाय तत्तत्कालतत्तत्पुरुषा
णामंतर्भावः अथैवं व्याप्तिघटकसकलप्रकाराणां ज्ञानलक्षणया भानसंभवेपि व्या
प्तिघटकसकलसंबंधाभाने व्याप्तिग्रहानुपपत्तिः सांसर्गिकविषयतायाः सामा
न्यप्रत्यासत्तिजन्यतावच्छेदकत्वेन तया संबंधभानासंभवात् । न च ज्ञानलक्षणया
मुख्यविशेष्यताभिन्नालौकिकविषयतासामान्यस्यैव कार्यतावच्छेदकत्वाभ्युपगमे
न तथैव संबंधभानसंभव इति वाच्यं । एवमपि लौकिकसंनिकर्षशून्यधूमादिवि
षयके द्रव्यत्वसामान्यलक्षणाजन्यज्ञाने स्मरणाद्युपनीतधूमत्वादेः प्र
कारतया धूमत्वसामान्यलक्षणया अभिचारो दुर्वार एवेति चेन्न । स्वयोग्यमु
ख्यविशेष्यकज्ञानजनकत्वं वह्निरिंद्रियाणामिति नियमरक्षणाय धूमत्वादि

भवानं.टी.
५

प्रकारकधूमादिमुख्यविशेष्यकत्वाद्युक्तौ हेतौ धूमत्वादिप्रकारकलौकिकत्वाद्युक्तादिसाम
ग्र्याहेतुत्वस्यावश्यवाच्यत्वयोग्यज्ञानासंभवेन व्यभिचारानवकाशात् । यत्तु धूमत्वादि
सामान्यप्रत्यासत्तिजन्यज्ञानानां यावद्धूमादिविषयकत्वनिर्वाहाय तत्तद्व्यापिकार्यतावच्छे
दककोटौ निवेशनीयमिति तत्तुच्छं यावद्धूमादिविषयकत्वे बाधकाभावेन विनिगमना
विरहेण ज्ञातस्य निर्वाहे कार्यतावच्छेदककोटिनिवेशे मानाभावात् । यत्र च यावद्धूमादि
विषयकत्वे बाधकं तत्र यावद्धूमाद्यविषयकत्वस्येष्टत्वात् । आख्याता बहिः पदस्येति बहि
रिन्द्रियस्य प्रत्यासत्तौ लौकिकसंबंधेश्चाक्षुषत्वादिजातिनिवेशो न तु मनस इत्येतत्तत्
कस्य बहिः पदस्येत्यर्थः । हीधितौ एवं चेति बहिरिन्द्रियप्रत्यासत्ताववत्तयोः कारणता
वच्छेदकघटकतया मानसेऽर्थाज्ञानज्ञाकार सामान्यमात्रस्य प्रत्यासत्तित्वे चेत्यर्थः । राम ५
। अतएव मनःसंयोगसत्त्वेऽपि न तस्य लौकिकत्वं मनोजन्यत्वं तत्त्वमावर्त्तकमिति मनः
स्य तत्तल्लौकिकसंबंधमनोरूपेन्द्रियजन्यत्वयोरनिवेशे इन्द्रियसंबद्धविशेष्यकत्वमपि

ज्ञानेन निवेशनीयमित्याशयः अणुत्वेनेति ज्ञानप्रकारत्वेन लक्षणघटे इदं च मानसो बोध
इत्यत्राप्यन्वेति। घटादिस्थले मानसानभ्युपगमेऽपि चाक्षुषादितः एव निर्वाह इत्य
तीन्द्रियपर्यन्तानुसरणं व्यावर्त्यापां ज्ञानलक्षणानिरासार्थं ज्ञानं लक्षणे यासकला
णुगोचरमानसंबोधनिर्वाह निरासार्थं दीधितौ यत्किंचिदिति सकलाणूपस्थितौ स
कलाणुगोचरमानसबोधस्य ज्ञानलक्षणाघटे च निर्वाहादिति भावः अथाणुत्वेन
यत्किंचिदणूपस्थितावपि स्वसत्वादिना सकलाणूपस्थितौ अणुत्वेनोपनीतभानात्म
कसकलाणुगोचरमानसबोधो ज्ञानलक्षणयैव संभवति यत्तु अणुत्वेनैव स्वाणुत्व
मात्रेणैव स्वर्थकतया स्वरूपान्तरेण अणूपस्थितिरेव च्छेदलाभान्न दोष इति तदसत्। एव
मपि सकलनिष्ठाणूनामणुत्वमात्रेण सकलं जन्याणूनां च जन्यत्वेन स्थितिमवच्छेद
लाभेन तादृशोपस्थितौ सकलाणुमानसस्य ज्ञानलक्षणयैव संभवादिति चेन्न अ
णुत्वेन स्वाश्रयाणुत्वेन यत्किंचिदणुमात्रोपस्थितौ सकलाणूपस्थितिस्वभावदशायां

भवाने-धी
६
6

मित्यर्थ कृतत्याऽसंभवात्। न चोपस्थितादित्यंतमफलमिति वाच्यं। मनःस्थलेऽलौकिकसंबं
धनिवेशे पिमनोऽलौकिकसंबंधवत्ज्ञानाहादणुत्वभ्रमदशायामणुत्वसामान्यप्रत्यास
त्त्यैव सकलाणुमानससंभवेनैव वैस्तुपष्टंभासंगत्यातत्साफल्यात्। अणुत्वेनोपस्थि
तं यत्किंचिदसन्निहितमनलस्थले यैवमानससंभवतीत्यत आह। सकलेति। वदंतीति य
द्यपि परासत्तमित्यनंतरमेवैतदुक्तं न तु मध्य एव तथापि वदंतीत्येनेनसूचितास्वरसः
परासत्तमित्यत्रापीति भ्रमनिरासाय मध्ये एतदुक्तिरिति ध्येयं। केचित्तु वदंतीत्यंतमे
व केनचिदुक्तस्यानुवादः एतेनेत्यादिकं तु न तथेति सूचनाय मध्य एव तदुक्तिरित्याहुः आ
रम्यायां संपातस्थले संपातजनितदुग्धप्रत्यक्षस्थले। वक्ष्यमाणेति। तदुत्तरं चाक्षुष राम
निखिलदुग्धसाक्षात्कारसंतानापत्तिरूपेत्यर्थः। अपेक्षणीयत्वस्य सहकारीत्वस्य। ६
अवश्यपेति। तदिंद्रियअन्यत्वादिविशेषणेऽपीत्यादि। न च चाक्षुषादिसामग्रीविशिंशे
घ्य क चाक्षुषादिप्रकारीभूतसामान्यस्य प्रत्यासत्तितायुपगमे नैव संपातस्थलीय

वह्न्यमानेऽतिप्रसंगवारणे उक्तसामग्र्याः सहकारित्वस्यनावश्यकत्वमिति वाच्यं। त
त्र सामग्र्याः कारणतावच्छेदकत्वापेक्षया सहकारित्व एव लाघवमित्याशयात् अ
तिप्रसंगेनेति किं चेत्यादिनावह्न्यमानेऽतिप्रसंगे स्यार्थः किमिति। तथा च ज्ञानप्रकार
सामान्यमेव प्रत्यासत्तिरस्तु किं तत्तद्विशेषणत्वेनेति भावः विशेषणेति वरमोक्तस्यापी
त्यादि। बीजमिति उत्कटशिष्यजिज्ञासाविषयतया प्रथमत इति शेषः दीधितौ एतेन
इंद्रियसंबद्धवृत्तित्वविशिष्टयत्तद्विशेष्यकज्ञानप्रकारत्वस्य ज्ञानेनेंद्रियजन्यत्वस्य
संबंधेन लौकिकत्वस्य च निवेशे। अन्यथेत्यादि वह्न्यमानेनुमेयाद्याह इत्यादि कारणायां
धूलीपटले इतीति धूलीपटले इत्यादीत्यर्थः तेन धूमभ्रम इत्यादेरपि सावधार
णत्वलाभः एतेन स्मृतव्याप्तेः पक्षीयधूमे धूमत्वदर्शनाद् गृहे स्मृतेऽविलंबेन
धूमपरामर्शसंभवेन हेत्वभावेन परामर्शानुत्पादादिति दीधितिराशयात एव इति
नवीनोक्तमपास्तं। तादृशदीधितेः स्मृतव्याप्तेः पक्षीयधूमे ग्रहाभावदशायामि

भवानंदी
८

प्रापकत्वात्। अन्यथा। अवधारणाभावे। परामर्शसंभवात् धूमपरामर्शसंभवात्। धूमी
पव्याप्यो ज्ञोतिन च धूमीयव्याप्तिग्रहाभावेपि व्याप्तिप्रकारकोपस्थितिर्वह्न्यादिशेषे विशेषण
मिति न्यायेन परामर्शोऽस्माकं संभवतीति वाच्यं। व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानमे
वानुमितिहेतुरित्याशयात्। ननु प्रथमोक्तक्रमेण विशेषणफलप्रदर्शनस्योचितत
या किं चेत्यादिकमसंगतं तत्र न चरमोक्तक्रमेण विशेषणफलप्रदर्शनादत्रत्तत्संगमयि
तुमाह चरमोक्तक्रमेणेति विशेषणेति चरमोक्तस्येत्यादिः। चरमोक्तक्रमेणैवेति केन चि
त्कारणेन प्रथममपरिगृहीतपाशीतेत्स्यागाभावस्य संप्रदायसिद्धत्वादिति भावः। वि
शेषणं तरमोरपि। लौकिकत्वतदिंद्रियजन्यत्वयोरपि। तद्घटितेति सामान्यग्रहेत्यर्थः राम
दोषेति न च सति दोषे तन्नैव प्रतिबंधात् वा हुष्टबज्ञानापत्तिरिति वाच्यं पुरोवर्त्तिनि ८
सामान्यग्रहप्रतिबंधकदोषस्यैवात्र दोषपदेन विवक्षितं तथा च तस्य सत्त्वेपि न द्रव्यत्व
धर्मिकनिरूढहे बाधकाभावात्। विगमेपीतीति न चैतानीं विगमेपि पूर्वसत्त्वाल्लौकि

कसंबंधनिवेशेपि चाक्षुषज्ञानापत्तिरस्त्येवेति वाच्यं। प्रकृते प्रत्यासत्तिघटकानां सर्वेषां वि
शेषणस्य तथाकारणस्य तावच्छेदकत्वाभ्युपगमेन कारणतावच्छेदकविशिष्टस्याव्यवहित
पूर्वकालसत्वस्य कार्योत्पत्तिप्रयोजकत्वाभ्युपगमेन चोक्तापत्त्यभावात्। स्थलमात्र
मितितल्लौकिकसंनिकर्षविगमेपीत्यादिकाप्यतिरिति तथा चेच्छापत्त्या चाक्षुषज्ञाना
पत्तिर्न संभवतीति भावः एतदिति कस्यापीति शेषः सामान्याभावेन। इंद्रियसंबद्ध
विशेष्यकज्ञानप्रकारीभूतसामान्याभावेन। वह्निसंयोगित्वेति। संयोगेन वह्निम
त्तिसंयोगेन वृत्तित्वे स्यर्थः। ज्ञानतोव्याप्तौ संयोगस्य संसर्गतया प्रकारत्वाभावेनासंगतिः
सामान्याधिकरण्येति तथा च पर्वतीयधूमे धूमव्यापकवह्निमद्वृत्तित्वरूपव्याप्ति
ग्रहासंभव इति भावः। यद्युतदानीं वह्निमत्वेन पर्वताग्रहेण पर्वतीयधूमे व्याप्य
ग्रहेपि वह्नित्वसामान्यं लक्षणया पर्वतीयवह्निग्रहेण पर्वतसंनिकर्षदशायां
स्मरणोपनीतपर्वतीयवह्निप्रकारेण पर्वतांशे लौकिकएव पर्वतीयधूमे वह्नि

भवानं·टी०
८
स्व२

महत्त्वरूपव्याप्तिग्रहः संभवस्येवेति नवीनैरुक्तं तच्चिंत्यं यत्र पूर्वमवगतः सततोयनय
वृशात्तत्र हि भास्वत्वइति नियमांगीकर्तृप्राचीनमतेऽप्रकरीत्या व्याप्तिग्रहासंभवात्
। वह्निसंयोगित्वेन वह्निमत्वेन एवमन्यत्रापि सर्वेषामिति न च सर्वेषां वह्निमतां ग्रहे
पि धूमो वह्निमतः प्रकारतया निवेशे न सामान्यप्रत्यासत्तिजन्यतावच्छेदककोटौ
च धूमस्य विशेष्यतया निवेशे न व्याप्तिग्रहानुपपत्तिरस्त्येवेति वाच्यं । वह्निमत्वेन स्मृत
पर्वतादिहते लौकिकसंनिकर्षेण पर्वतीयधूमसंयोगरूपव्याप्त्यंशे भानसंभवेन पर्व
तीयधूमे व्याप्तिग्रहानुपपत्तेरभावात् नवीनास्तु यत्र वह्न्यादिमत्त एव साध्यतात्र व राम
ह्न्यादिमत्त्वसामान्यप्रत्यासत्त्या यावद्वह्निमतां भाने ऽसंनिकृष्टा या अपूर्वव्यक्तेरनु ८
मानानुपपत्तिस्तद्व्यक्तिव्याप्तेर्ग्रहात्तत्र आह सामान्यं चेतीत्याहुस्तच्चिंत्यं अत्रापि द्रव्यत्वा
दिना सकलवह्निमदुपस्थितेऽप्रत्येकोपनयेनैव व्याप्तिग्रहसंभवात् । न च यत्र
पूर्वमवगत इति नियममात्रोक्तरीत्या व्याप्तिग्रहसंभव इति वाच्यं । तादृशनियमांगी

कर्तृप्राचीनमुखत्वाभिप्रायानुसरणेऽप्युक्तरीत्या वह्निसाध्यक एवाव्याप्तिसंभवेन वह्नि
मत्साध्यकानुसरणक्लेशो वैयर्थ्यात्। अनेके त्वाहुः अत्र रूपत्रितयादेरनुगमनत्रित्वा
घवच्छिन्नस्य वारणाय यावच्छेदकान्तं नानाधिकरणप्रत्यासत्त्या तद्घटादेरनेकवृत्तिता
वच्छेदकतद्घटत्वावच्छिन्नस्य वारणाय यानुगतरूपेति अनेकवृत्तीत्यर्थकं रूपावच्छि
न्नमिति अनेकमिति पाठः। तेन नानाधिकरणप्रत्यासत्त्यैकव्यक्तिगगनादेरखंडस्य
नखंडत्वापत्तिः। न चैवमप्यनेकवृत्तितावच्छेदकपृथिवीत्वादिव्याप्यानेकघटत्वादि
वृत्तिघटत्वत्वावच्छिन्नघटत्वादेरखंडत्वापत्तिः। न चैवमप्यनेकवृत्तितावच्छेदकपृथि
वीत्वादिव्याप्यानेकघटत्वादिवृत्तिघटत्वत्वावच्छिन्नघटत्वादेरखंडत्वापत्तिरि
ति वाच्यं। प्रत्येकमनेकावृत्तित्वे सतीत्यस्यापि निवेशात्। अनेकवृत्त्येकमिति तन्नरूपा
देर्वारणाय यदृस्वतं। वह्निमत्त्वादेर्वारणायैकमिति। दीधितौ वेद्येति। तथा च वनके व
लमखंडमेव साध्यं किं तु सखंडमपीति सकलवह्निमतामखंडैकसामान्याभावे

भवानं-टी-
९
९

पि वह्निमत्त्वलक्षणस्य सखंडसामान्यस्यैव ग्रहसंभवेन न व्याप्तिग्रहानुपपत्तिरिति भावः। के
चित्तु। ननु सामान्यस्य प्रत्यासत्तित्वे घटाभावादिप्रत्यासत्त्या तत्तदाश्रयप्रत्यक्षं न स्यात्त
स्य सामान्यत्वाभावादत आह सामान्यं चेति सामान्यलक्षणेत्यत्र सामान्यपदं धर्म
मात्रपरमिति घटाभावादेरपि सखंडसामान्यतया तत्तदाश्रयप्रत्यक्षासंभव इति भा
व इत्याहुस्तत्तुच्छं तथा सति नान्वित्याद्यग्रिमपूर्वपक्षग्रंथस्य चाखंडाभिप्रायकत्वाप
त्त्या पूर्वपक्षसिद्धांतयोरेकविषयकत्वाभावेनासंगत्यापत्तेः। ननु सखंडस्य वह्निमत्त्वा
देर्न सकलवह्निमतां प्रत्यासत्तित्वसंभवः तस्य नानात्वेन सकलवह्निमत्प्रत्यासत्ते
त्वादत आह धूमीति सखंडं चेति। आरब्धायां सखंडे वा वह्निमत्त्वादौ सखंडवह्निमत्त्वादि राम
सामान्याश्रयवह्निमद्दृष्टौ। स्वाश्रयेति स्वाश्रयसंयोगित्वसंबंधेन संपर्कः प्रत्यासत्तिं ९
। वस्तुगत्या सकलवह्निमत्प्रत्यासत्तिं। तथा च सामान्यभेदेन कारणताभेदेन वह्निसा
मान्याश्रयादिप्रत्यक्षे वह्निमानित्यादिज्ञानीयप्रकारताश्रयवह्नित्वादेरुक्तपरंपरासं

वंधेनकारणत्वतयावन्हिमानितिज्ञानोत्तरंसकलवन्हिमतोप्रत्यक्षसंभवान्न व्याप्तिग्रहानु
पपत्तिरित्याशयः ज्ञानेइतिसप्तमीतिशेषः।ननुसामान्यस्यस्वाश्रयस्यैवभानजनकत
याकालादेर्घटत्वानाश्रयत्वतयानज्ञानापत्तिरतआह तस्यापीति।हीधितौयेनसंबंधे
नेतितृतीयाच्छेदोऽवच्छिन्नत्वंज्ञाप्यत्वंइत्यत्रोरव्यातार्थप्रकारतायांतदन्वयः तथाचतत्सं
वंधावच्छिन्नप्रंसामान्यजनकतायांतत्संवंधावच्छिन्नप्रकारत्वस्यैवनिवेशेनकालि
कसंवंधेनजनकतायांकालिकसंवंधावच्छिन्नप्रकारत्वस्यैवनिविष्टतयोक्तस्थलेघट
त्वस्यतादृशप्रकारत्वाभावान्नकालादिभानप्रसंगइतिभावः नन्वेवंवन्हिमानिति
ज्ञानोत्तरंसकलवन्हिमतांसामान्यप्रत्यक्षानुपपत्तिःवन्हित्वस्यपरंपरासंवंधे
नतत्राप्रकारत्वादतआह व्याख्यायांइत्यंवेतितत्संवंधावच्छिन्नजनकतायांतत्संवं
धावच्छिन्नप्रकारत्वनिवेशेवेत्यर्थः वन्हिमत्वेतितत्समाश्रयवन्हिमत्ताद्वित्यर्थः प
रंपरेतिउक्तेत्यादिज्ञानानंतरमेवेतिएवकारेणवन्हिमानित्यादिज्ञानमवछेदः

सामान्यजन्यज्ञानमितिसकलवह्निमदादीनामित्यादि।नचैवंतादृशसामान्यज्ञानेवह्नित्वेनैव
वह्निमतांभानेनवह्न्यप्रवृत्तिज्ञानंसंपन्नंनतुप्रकृतोपयुक्तंवह्निमंतइतीतीवाच्यं।तत्रव
ह्नित्वेनवह्निमतांभानेपिसंसर्गघटकतयापूर्वोपस्थितवह्नेःप्रकारतयापिभानेबाध
काभावात्।नन्वेवंपरंपरासंबंधेनवह्नित्वानवगाहिवह्निमानितिबोधानंतरसकल
वह्निमतांप्रत्यक्षानुपपत्तिरतआह।वस्तुतस्त्विति।ज्ञानस्यैवेति।इदंचवक्ष्यमाणरीत्या
सामान्यज्ञानंप्रत्यासत्तिरित्याशयेनसामान्यस्यप्रत्यासत्तित्वेतादृशज्ञानप्रकारताव
च्छेदकवह्नित्वावच्छिन्नस्यसंयोगेनतादृशज्ञानप्रकारतावच्छेदकवह्नित्वस्यैववापरंपर
याहेतुत्वंबोध्यं।ज्ञानस्येति।इदमपिज्ञानस्यप्रत्यासत्तित्वेसामान्यस्यप्रत्यासत्तित्वे राम
ज्ञानप्रकारवह्नित्वस्येतिबोध्यं।प्रत्यक्षस्योपपत्ताविति।नचसंबंधांतरेणवह्नित्वसा १०
मान्यज्ञानेव्यभिचारवारणायपरंपरासंबंधेनवह्नित्वप्रकारकज्ञानजन्यता
यांपरंपरासंबंधेनवह्नित्वप्रकारकत्वस्यावश्यंनिवेश्यतयावह्निमत्प्रत्यक्षस्यैतादृ

शप्रकारत्वाभावात्कथं तेनैव तदुपपत्तिरिति वाच्यं। तादृशप्रत्यक्षे वह्निपारतंत्र्येण वह्नि-
त्वस्य तादृशसंबंधेन प्रकारतया भाने बाधकाभावात्। परंपरासंबंधेनेति। न च
तत्रापि वह्निपारतंत्र्येण परंपरासंबंधेन वह्नित्वावगाहित्वमस्त्वेवेति वाच्यं। वह्नि-
मानिति शाब्दानुमित्याद्यनंतरमपि सकलवह्निमत्त्वप्रत्यक्षस्यानुभवसिद्धतया तत्र
तादृशावगाहित्वासंभवात्। तथा कल्पनात् उक्तकार्यकारणभावांतरकल्पनात्।
न च तथा कल्पनेऽपि परंपरासंबंधेन वह्नित्वप्रकारकज्ञानस्यापि उक्तप्रकारणत्वं स-
त्त्र दुर्वारमिति वाच्यं। इष्टत्वात्। अत्र नवीनाः परंपरासंबंधेन वह्नित्वप्रकारकज्ञान-
मेव तत्र कारणं उक्तत्वान्न तत्कारणत्वांतरमपि कल्पनीयं गौरवात्। वह्निमा-
निति शाब्दानुमित्यादिस्थलेऽपि तदुत्तरं तादृशज्ञानं कल्पयित्वा प्रत्यक्षेण विलंबेन
सकलवह्निमत्त्वप्रत्यक्षोपपादनसंभवात्। न च परंपरासंबंधेन वह्नित्वबाधबुद्धि-
सत्त्वे तादृशज्ञानकल्पनं न संभवतीति वाच्यं। तादृशज्ञानस्यानिर्धर्मितावच्छेदक-

तया तत्र बाधबुद्धेर प्रतिबंधकत्वात् । अथ तादृशज्ञानस्य कारणत्वं क्लृप्तमित्येवासिद्धं व
न्हित्वरूपेण वन्हिप्रकारकज्ञानस्यैव वन्हिसामान्याश्रयप्रत्यक्षहेतुतया परंपरासंबंधेन
वन्हित्वप्रकारकज्ञाने साक्षात्संबंधेन वन्हेः प्रकारत्वमुपगम्य तादृशज्ञानोत्तरं परंपरा
संबंधेन वन्हित्वाश्रयप्रत्यक्षोपपादनसंभवेन तादृशहेतुताया एव क्लृप्तत्वमित्यस्यापि
सुवचत्वात् तथा च विनिगमनाविरहेण उभयोरपि कारणत्वमवश्यं कल्पनीयमिति
चेन्न । वन्हित्वरूपेण वन्हिप्रकारकज्ञाने वन्हित्वोपस्थितेरावश्यकत्वेन परंपरासंबंधे
न वन्हित्वप्रकारकत्वसंभवे यत्र वन्हित्वमेवोपस्थितं न तु वन्हिस्तत्र परंपरासंबंधेन
वन्हित्वप्रकारकज्ञाने विशेष्यज्ञानविरहेण वन्हेः प्रकारत्वासंभवस्यैव विनिगमक
त्वादिति वदंति तदसत् परंपरासंबंधेन वान्हित्वमहानसीति ज्ञानस्य निर्धर्मितावच्छेदक
ज्ञानेपि प्रतिबंधकत्वस्य सर्वसिद्धतया तादृशवन्हित्वज्ञानसत्वे परंपरासंबंधेन व
न्हित्वप्रकारकज्ञानकल्पनासंभवेन सर्वत्र वन्हिमानितिशाब्दानुमित्याद्युत्तरं तादृश

॥

ज्ञानकल्पनया स्वरूपविलंबेन सकलवह्निमत्त्वस्योपपादनासंभवात् । एतेन सर्व
त्रवह्निमानिति ज्ञानमेव वह्नित्वविशिष्टवैशिष्ट्यावगाहि वह्निसामान्याश्रयप्रत्यक्षे का
रणमिति मान्योक्तिरपि चिंत्यैव अन्यप्रकारकस्यापि हेतुतायाः दुर्वारत्वात् तस्मात् उभ
यविधज्ञानस्यैव हेतुत्वमित्येव सम्यगिति संक्षेपः सर्वं उत्वेतित्यादेर्वह्न्यभावा
नुधायापाह अखंडस्वेति । उक्तत्वेनेति सखंडे वाखंडे भेदेत्यादिनेत्यादि अनवतारादि
ति । अथाखंडोपाधौ पि घटत्वादिति विशिष्टवैशिष्ट्यबोधे घटादिपारतंत्र्येण परंपरासंबं
धेन प्रकारीभूतघटत्वादेरेव प्रत्यासत्तित्वसंभवात् कथं शंकावतार इति चेन्न इंद्रियसंब
द्धविशेष्यकज्ञानप्रकारखंडत्वाविशेषेण तद्घटघटत्वयोरुभयोरेव प्रत्यासत्तित्वेन
शंकावतारसंभवात् । अत एव घटत्वादिकमेव न तु तद्घटादिरिति सिद्धांते वक्ष्यति । पर
पराघटकेति स्वाश्रयप्रतियोगिकप्रागभावादिमत्त्वरूपपरंपरासंबंधघटकेत्यर्थः ।
वाहुल्यप्रदर्शनायेति तत्प्रदर्शनं चास्ति परंपरया प्रत्यासत्तस्यापि प्रत्यासत्तित्वमुपपा

ऽनायेति भावः । न च घटप्रागभावादिस्थलेपि घटत्वादेः स्वाश्रयघटवृत्त्यादेरेव परंपरासंबं
स्संभवतीति न तत्रूपकथाहुत्यमिति वाच्यं विशिष्टवैशिष्ट्यबोधे विशेषणघटितपरंपरा
संबंधेनैव पारतंत्र्येण प्रकारतायाः स्वीकारात् । न चाभावे स्वावच्छिन्नप्रतियोगिताकत्वसं
बंधेन प्रतियोगितावच्छेदकभानात् तादृशनियमो न संभवतीति वाच्यं । तत्रापि प्रतियोगिवृत्ति
त्वघटितावच्छेदकताघटितसंबंधभानेन तादृशनियमसंभवात् आदिपदोपग्राह्यं तत्वेन
ऽसङ्ग्रहं आदिपदोपग्राह्यमिति क्वचित्पाठः । दीधितौ घटत्वादेरेवेति एवकारेणानित्यमवच्छेदः
तथा चानित्यसामान्यस्यैव प्रत्यासत्तित्वमिति भावः तद्विशिष्टरूपाद्यात्मतद्व्यक्तिस्थले रूपत्वा
देरेव प्रत्यासत्तित्वमास्तामित्यत आह व्याख्यायां किं चेति । ओ तत आहेति यथोक्तपरंपरायाः सं राम १२.
बंधत्वानभ्युपगमेत्याह तत्स्वरसेनैवेतीत्यपि कश्चित् । तादृशमिति बहिरिंद्रियजन्य
ज्ञाने इति शेषः सामान्यज्ञानं सामान्यप्रकारकं ज्ञानं । अत्रापि बहिरिंद्रियस्यलौकिकः
। सांबंधोऽग्राह्यः । तथा चेतन्मते समवायादिसंबंधावच्छिन्नधर्मतादिप्रकारतानि

पितत्वेऽपि [illegible]मात्मपुरुषविशेष्यतासंबंधेन तत्कालीनतत्पुरुषीयचाक्षुषत्वावच्छिन्नं प्र
ति तत्कालीनतत्पुरुषीयघटचाक्षुषत्वरूपसामानाधिकरण्याच्चक्षुरादिसंयोगादिमद्
भिन्नविशेष्यताविशिष्टघटत्वादिप्रकारताशालितत्पुरुषीयचाक्षुषत्वादिनास्व
विषयघटत्वादिमत्त्वसंबंधेन हेतुता। व्याप्तिः पूर्वोक्तैव। भावसत्त्वेऽपि घटत्वा
दिप्रकारकज्ञानविरहविशिष्टघटत्वादिविशिष्टविशेष्यतासंबंधेन मानसत्वावच्छिन्नं प्रति स्वसं
बंधेन घटत्वप्रकारकज्ञानत्वादिना हेतुता बोध्या। एतेन पूर्वकल्पे कालपुरुषभेदेन
कारणतायां गौरवमित्यपि निरस्तं तत्कल्पानुसरणे सन्निकर्षे आत्मविशेषप्रत्यास
त्त्यां हेतुत्वमित्यपि निरस्तं सन्निकर्षस्य विषयनिष्ठतया हेतुतायाः। इंद्रियसंबंधत्वनिवे
शेन कालपुरुषनिवेशस्यावश्यकत्वाच्च। नवीनेति। प्राचां मते इंद्रियभेदेन कालभे
देन कारणतायां गौरवात्। वह्न्यभावे सति तेषां वारणाय तन्निंद्रियकोत्पन्नकतज्ज्ञमयूर्त
बोधसामग्र्या अवश्यापेक्षणीयत्वेन विशिष्टबोधस्य भिन्नत्वेन भावः। अतीतेति

भ.सा.टी. १३ 13

अथैवं द्रियसंबंधादिधूमत्वकालोत्तरमपि वसामान्यविषयकज्ञानधूमत्वकालोत्तरमपि सामा
न्यप्रकारकज्ञानसामग्र्यपेक्षयैव सामान्य अप्रत्यक्षप्रकारकस्य संभवे स्वरूपसत्सामा
न्यस्यैवेव प्रत्यासत्तित्वमास्तामिति शंकानिरासार्थमुक्तमतीत्याद्यनुरोधादिति सा
मान्यज्ञानमात्रमिति एतन्मते च धूमत्वादिप्रकारतानिरूपितधूमादिनिष्ठविशे
ष्यतासंबंधेन तत्पुरुषीयप्रत्यक्षत्वावच्छिन्नं प्रति स्वविषयधूमत्वादिमत्त्वसंबंधे
न तत्पुरुषीयधूमत्वादिज्ञानस्य हेतुता अपेक्षैतन्मते समवायसंबंधेन धूमत्वादिज्ञा
नसत्वे संबंधांतरेण धूमत्वादिप्रकारकज्ञानापत्तिः। कथं वा रत्नीयेति चेत्। तेन सं
बंधेन तदिंद्रियकरणकतत्कर्मवत्त्वबोधसामग्र्याः सहकारित्वेन तदभावेन तदापत्ति राम
वारणस्य तादृशसामग्रीसत्त्वे च तदापत्तेरिष्टापत्त्यैव परिहारात्। मात्वास्तु तत्सं १३
बंधेन तत्प्रकारकज्ञानेन तत्संबंधातिरिक्तसंबंधावच्छिन्नविषयताभिन्नतद्विषयताशा
लिज्ञानत्वेपसंबंधभेदेन हेतुत्वमेकापत्तिर्वा रत्नीयेत्याहुः। अत्र सामान्यविषयतया

ज्ञाने उपलक्षणं नतु विशेषणमतीताघटादेर्भानमिति ध्येयं । नन्वेतन्मतेपि सामान्यभेदेन
कारणताभेदेनातीताघटादेर्भानस्य सत्त्वे सामान्यज्ञानस्य प्रत्यासत्तित्वेपि विषयस्य
त्वे धूमत्वादिसामान्यस्यैव हेतुत्वमास्तामिति । चेन्न धूमत्वादेर्हेतुत्वे गुरुशरीरस्य धूम
त्वत्वादेरवच्छेदकत्वे गौरवापत्यात् तत्रापि लाघवेन स्वरूपसद्धूमत्वादिघटिततज्ज्ञानत्वेनै
व हेतुत्वात् । सामान्यास्तु अभावत्वप्रतियोगित्वयोरनुपस्थितयोरपि प्रकारत्वेन प्राप्यभि
काभावत्वादिवुद्धेर्यावदभावविषयताया अनुभवविरुद्धत्वेन च तादृशबुद्धेर्यावदभा
वविषयकत्ववारणाय तत्रापि सामान्यज्ञानस्य प्रत्यासत्तित्वमावश्यकमित्याहुः इत्थं
च सामान्यज्ञानमात्रस्य प्रत्यासत्तित्वे च निर्विकल्पकात्मकमिति इदमुपलक्षणं स्म
रणात्मकमित्यपि द्रष्टव्यं । अत्र प्राचीनानुयायिनः सामान्यप्रकारकज्ञानमेव प्रत्या
सत्तिः । दीधितावपि सामान्यप्रकारकज्ञानपरमेव निर्विकल्पकादिसाधारणज्ञान
मात्रस्य प्रत्यासत्तित्वे घटत्वादिनिर्विकल्पकानन्तरमाघविशिष्टज्ञानोत्पत्तिसमय
एव घटत्वादिप्रकारेण निखिलघटत्वाद्याश्रयसाक्षात्कारापत्तिः एवमयं घट इत्यादि

भवानं.दी.
१४

१५

घटविशेष्यकज्ञानानन्तरमेतद्घटाधिकरणसकलसाक्षात्कारापत्तिश्च। अपि च घटत्वादिनिर्विक
ल्पकानन्तरं यावद्घटादिविषयकसाक्षात्कारे इष्टापत्तिः तथापि तत्र तृतीयक्षणे सामान्य
लक्षणया यावद्घटविषयकप्रत्यक्षस्वीकारेण क्षणविलंबस्याशयाप्यनिर्णयत्वात्। ए
वमयं घट इत्यादिघटविशेष्यकज्ञानादेतद्घटाधिकरणसकलसाक्षात्कारेपीष्टापत्तिः। द्वि
तीयक्षणे एतद्घटप्रकारकज्ञानसंभवेन तृतीयक्षणे सामान्यलक्षणया एतद्घटाधिक
रणसकलसाक्षात्कारस्य तथापि स्वीकारादिति चेत्प्रकारेण तावच्छेदकगौरवादिरूपबाध
कसत्त्व एवानायत्या क्षणपञ्चतापांगीकारेण प्रकृते विषयित्वप्रकारित्वयोर्द्वयोरेव सम
शरीरतया लाघवगौरवाभावेन क्षणपञ्चतापस्यान्याय्यत्वात्। किंच सामान्यज्ञानस्या राम
त्रस्य प्रत्यासत्तित्वं निर्विकल्पकविषयतायां विशेष्यतायां सांसर्गिकविषयतायां च प्रकारेण १४
तावच्छेदककोटिनिवेशे गौरवं सामान्यप्रकारकज्ञानमात्रस्य प्रत्यासत्तित्वे प्रकारतायाएव
तन्निवेशे लाघवमिति तदेवोचितमिति वदंति अत्रोच्यते सामान्यप्रकारकज्ञानस्य प्रत्यास
त्तित्वे निर्विकल्पकोत्तरलौकिकप्रत्यक्षे व्यभिचारवारणाय कार्यतावच्छेदके अलौकिकान्यत्वं

देयं । एवमत्र घटत्वमित्यादिस्मरणादितो जायमाने घटत्वप्रकारकघटमुख्यविशेष्यकस्मर
णस्यैवाभिवदितसुपनीतभानेऽभिचारवारणाय मुख्यविशेष्यकत्वं देयं एवमत्र घटत्व
मिति घटत्वविशेष्यकस्मरणादितो जायमाने घटत्वप्रकारकमुख्यविशेष्यकज्ञानस्ये
वाभिचारवारणाय तद्व्यत्वमपि देयं एवं घटत्वप्रकारकज्ञानं विनापि द्रव्यत्वादि
विशिष्टबुद्ध्यात्मकघटत्वनिर्विकल्पकोत्तरं द्रव्यत्वादिसामान्यलक्षणया जायमा
नेयावद्घटमुख्यविशेष्यकप्रत्यक्षेऽभिचारवारणाय द्रव्यत्वादिसामान्यलक्षण
जन्यघटमुख्यविशेष्यकप्रत्यक्षान्यत्वमपि देयमिति मतभेदेन गौरवमिति तदपेक्षया सा
मान्यज्ञानमात्रस्य प्रत्यासत्तित्वमुपेत्य लक्षणपलाग्रांगीकारे विशेष्यत्वादिनिवेशप
र्युक्तगौरवांगीकारस्य सम्यक् । यद्यपि सामान्यज्ञानमात्रस्य प्रत्यासत्तित्वे सामान्या
ज्ञानदशायां विशेषणज्ञानाभावादेव सामान्यप्रकारकप्रत्यक्षासंभवे सामान्यप्रत्या
सत्तेः पृथक्कारणत्वस्यैवावित्तया प्रतिरिति तत्र । विशिष्टज्ञानसामान्यं प्रति विशेषण
ज्ञानहेतुताया एवासिद्धेः विशिष्टप्रत्यक्षे सामान्यलक्षणयैव निर्वाहात् अनुमि

भवानं·टी०
१५
15
त्वाद्दोषपरामर्शादिति नैव निर्वाहात् । वस्तुतस्तु समवायेन विशेषण ज्ञानहेतुतया स्वविषयसा
मान्याश्रयत्वसंबंधेन साध्याप्रज्ञानहेतुताया निराकरणं न संभवतीत्येव सारमिति सि
कृ । एतदेवाभिप्रेत्याह ध्येयमिति । पूर्वोक्तेति धर्मिणि दोषवशादित्यादिनोक्तेत्यर्थः स्वरू
पकथनमात्रमिति । ननु सहकारितावच्छेदककोटौ निवेशनीयं प्रयोजनाभावादिति भा
वः । नन्वेवं घटत्वाद्यादिसामग्रीसत्त्वे घटत्वादिसाध्याप्रत्यासत्त्या घटचाक्षुषापा
त्तिः तद्वानीं घटत्वादिमत्त्वबोधकत्वावादिसामग्र्या एव सहकारिण्याः सत्त्वात् । न च त
द्वानीं त्वाचादिसामग्र्या चाक्षुषादिप्रतिबंधात्सोतापत्तिरिति वाच्यं । भिन्नविषयकचाक्षु
षादिकं प्रत्येव त्वाचादिसामग्र्याः प्रतिबंधकत्वात् इत आह । त्वाचादीति लौकिकेत्यादिः । सा राम
मान्यत एव चाक्षुषत्वावच्छेदेनैव । एवकारेणाभिन्नविषयकत्वमवच्छेदः । न च समानवि १५
षये भिन्नविषये वा चाक्षुषसामग्र्या एव बलवत्त्वात्कथमेतदिति वाच्यं त्वाचसामग्र्या
श्चाक्षुषसामग्र्यपेक्षया लघुत्वेन तस्या एव चाक्षुषे प्रतिबंधकत्वमित्याशयात् । वस्तु
तस्तु सामान्यलक्षणाजन्यज्ञानस्यापि यत्किंचिद्विशेष्यांशे लौकिकत्वेपीतरांशे लौकिक

तेनतद्देशीत्वाच सामग्र्या एव चाक्षुषे प्रतिबंधकत्वं युक्तं । अन्येषां किंकप्रमप्युक्तसामग्र्या
स्सर्वता दुर्बलत्वात् । एवं च सामान्यत एवेतस्यालौकिकचाक्षुषत्वावच्छेदेनैवेत्यर्थ इति ध्ये
यं कथंचित्प्रयोजनसंभवे निष्प्रयोजनत्वपर्यवसायिस्वरूपकथनमात्रताभ्युपगमो ऽ
नुचित इत्याशयेनाह वस्तुतस्त्विति । अतएवेति सामग्रीपदस्य फलोपधायकपरत्वे सा
मान्यज्ञानघटितस्यैव तथात्वेन तत्र सामान्यज्ञानातिरिक्तत्वरूपांतरत्वं न संभवतीत्यसा
धारणकारणपरत्वे तु तादृशानामालोकादीनां तादृशांतरत्वं संभवत्येवेति भावः । तेनतेन
रूपेणेत्यस्य अलोकत्वादिनेत्याशयेनैवेति । तथा च तादृशासाधारणकारणानामा
लोकादीनामभावादीनां तत्तद्रूपेण जन्यज्ञानं । प्रतिकारणत्वं क्लृप्तमेव न तु सामान्यप्रत्या
सत्तिजन्यज्ञाने स्वातंत्र्येण कारणत्वं कल्प्यते किंतु तेषां सामान्यप्रत्यासत्त्या फलजनने
सहकारित्वमात्रमिति भावः । न चालोकादिजन्यतावच्छेदकसामान्यप्रत्यासत्तिजन्य
तावच्छेदकयोर्व्याप्यव्यापकभावाभावेनोक्तसहकारित्वासंभव इति वाच्यं । जन्यताव
च्छेदकयोः सामानाधिकरण्यमात्रस्यैव सहकारितायां तन्त्रत्वेन व्याप्यव्यापकभावाभावे

यि सत्तिविरहात्म्ना अनुभवे विवादस्याहृयदीति । अनुभवविरुद्धेति । तथा चसुरभिचंदनमि
त्यादि चाक्षुषे सौरभत्वादिसामान्यप्रत्यासत्यासकलसौरभादिनोंभो पस्थितिरिति भा
वः । तद्धर्माश्रयेत्तिस्यात् तत्रैवेत्यादि तेन । प्रकारांशे त्वलौकिकचाक्षुषादिसामग्र्यनपेक्षणे
न । यत्किंचिद्विशेष्यांशे · घटाद्यंशे · सामान्यांशेन्यत्र चाक्षुषान्यतरत्वाद्यंशे · निखिलेति
घटत्वाद्यादिविषयकत्वमित्यर्थः । वस्तुतस्तु । यत्किंचिद्विशेष्यांशे धूलीपटलाद्यंशे । तद्ध
र्मांशे धूमत्वाद्यंशे । निखिलेति । अयमाशयः प्रकारांशेपि लौकिकस्य धूलीपटलाद्यं
शे लौकिकस्य निखिलधूमादिविषयत्वमनुपपन्नं तस्य धूमत्वाद्यंशे अलौकिकत्वात् तथा
तत्पूर्वतदंशे लौकिकचाक्षुषादिसामग्र्यभावात् विशेष्यांशे एव लौकिकत्वापेक्षत्वे च
विशेष्यधूलीपटलाद्यंशे तादृशसामग्रीसत्वात् नुपपन्नमिति सारं वक्ष्यमाणरीत्यैवा
नतिप्रसंगे स्वातंत्र्येण तादृशसामग्र्या हेतुत्वमफलमित्याशयेनाह वस्तुतस्त्विति । स्वयो
ग्येति । अत्र स्वयोग्यमुख्यविशेष्यकज्ञानजनकत्वं स्वलौकिकसंनिकर्षाश्रयनि
ष्ठमुख्यविशेष्यकलौकिकज्ञानजनकत्वं सौरभस्य मुख्यविशेष्यत्वेप्यनया चिन्तनमात्रमु

ख्यविशेष्यकज्ञानजनकत्वं वासिद्धं सुरभिमित्यादिज्ञाने परमाण्वादेरपि तथात्वादिति दूष
णानवकाशः चाक्षुषज्ञानवारणाय तादृशज्ञानस्य चाक्षुषत्ववारणाय तादृशज्ञानं या
न्नसाधेयत्वेन तु चाक्षुषमित्यत्र नियामकत्वाभावेनेत्याकूतं । हेतुतावाच्येति । निरवच्छिन्नसौ
रभत्वादिनिष्ठप्रकारतानिरूपितमुख्यविशेष्यतासंबंधेन चाक्षुषादिकं प्रति चाक्षुषादिलौ
किकसंनिकर्षस्य स्वसमानाधिकरणस्वीयमुख्यविशेष्यतानिरूपितसौरभत्वादि
निष्ठनिरवच्छिन्नप्रकारतानिरूपितमुख्यविशेष्यतासंबंधेन हेतुत्वं एवं सावच्छिन्नप्र
कारतास्थले प्रकारतावच्छेदकमादाय हेतुत्वं विशेष्यत्वादिकं च व्यापारानुबंधितया
ज्ञेयं । तेन सौरभत्वेन सौरभचाक्षुषस्य मुख्यविशेष्यकचाक्षुषाप्रसिद्ध्या सौरभत्ववि
शिष्टलौकिकचाक्षुषसामान्याप्रसिद्ध्या च सौरभत्वेनेत्याद्यवाच्यत्वं तन्नत्यकमि
त्याद्युपेपानवकाशः अनतिप्रसंगे सुरभिचंदनमित्यादिचाक्षुषस्य सकलसौरभा
दिविषयकत्वाभावसंभवे । हेतुतायां न लौकिकत्वस्येति । लौकिकत्वं निवेश्य तादृशा
बोधसामग्र्याः स्यात्तंत्र्येण न हेतुत्वे स्पर्धः अनतिप्रसंगमेवोपपादयति सुरभिचंद

भट्टा.टी.
१७
17

नस्मितिसंभवात्संभवद्युक्तिकत्वात्तच्चेन संभवति उक्तसामग्रीरूपकारणाभावादिति
भावः। सौरभत्वाविशिष्टलौकिकचाक्षुषसामग्री सौरभत्वघटितोक्तसंबंधेन चक्षुःसं
योगादिरूपसामग्री तादृशः चाक्षुषः तत्राप्रसिद्ध्यात तद्धर्मघटितोक्तसंबंधेन चाक्षुषा
प्रसिद्ध्या। तादृशेति तद्धर्मघटितोक्तसंबंधेन चक्षुरादिसंयोगस्य कारणत्वाकल्पना
दित्यर्थः। तद्धर्मवद्विशेष्यकेति तद्धर्मवन्मुख्यविशेष्यकेत्यर्थः एवमग्रेपि। अलौकिके
ति तद्धर्मस्यातीन्द्रियत्वादेव लौकिकचाक्षुषवारणादिति भावः नन्वनामाद्याप्रसिद्धिः
तद्धर्मधीप्रियप्रत्यक्षापत्तेरेव चाक्षुषसामग्रीकाले तद्विशेषणत्वनियामकाभाव
काले च तन्मुख्यविशेष्यकचाक्षुषपर्यवसानादत आह दिगिति तादृशातीन्द्रियधर्मा राम
श्रयमुख्यविशेष्यकप्रत्यक्षे विरोधि चाक्षुषादिसामग्र्यभावो हेतुः तन्मुख्यविशेष्यक १७
प्रत्यक्षं च मानससमेव प्रसिद्धमिति तादृशचाक्षुषसामग्रीकाले तादृशमानसवारणाय
तत्र तादृशचाक्षुषसामग्र्यभावस्य हेतुत्वे प्रत्यक्षत्वमंतर्भाव्येव तद्धेतुत्वकल्पनादेवो
क्तापत्तिवारणमिति न कोपि दोष इति भावः। पूर्वमते। स्वरसमालक्ष्य दीधितौ अतएवे

ति। अंधतमस इत्ति। इदं चेष्टापत्तिनिरासाय व्याख्यायां प्रतिपत्तव्य इत्ति प्रतिपत्तिस्व से सौरभमि
त्या आस्थिरत्वानुपपत्त्या आपाद्यत्वादिति प्राचां मत इत्यादिग्रन्थे तौ तथ्येवेति। तथा च
तद्धर्मप्रकारकतद्धर्माश्रयविशेष्यकप्रत्यक्षत्वतद्धर्मप्रकारकतल्लौकिकसंनिकृ
त्व४ र्षजन्यत्वतद्विषयकप्रत्यक्षयोः कार्यतावच्छेदकयोर्भेद एव तयोर्भेद इति भावः। ज्ञान
लक्षणायाः प्रत्यासत्तित्वे मानमाह अत एवेति व्याख्यायां तज्ज्ञानासंभवादित्ति न च सौ
रभत्वज्ञानात्मकसामान्यलक्षणया जन्यतावच्छेदककोटौ सौरभत्वप्रकारतया औ
पि निविष्टतया सौरभत्वसामान्यलक्षणया तत एव सौरभत्वभानं संभवत्येवेति वाच्यं।
सामान्यज्ञानस्य स्वविषयसामान्याश्रयत्वसंबंधेनैव हेतुतया सौरभत्वज्ञान
स्य तेन संबंधेन सौरभत्वेऽभावेन सामान्यलक्षणातोऽनिर्वाह इत्याशयात्। ता
न्वेवमपि सौरभत्वपर्यंतानुधावनं व्यर्थं। सौरभत्वप्रकारतानिरूपितसौरभविशे
ष्यताशालि चाक्षुषे सौरभत्वप्रकारकलौकिकचाक्षुषसामग्र्या अपेक्षणीयतया

प्रकृते तत्संभवेन सौरभस्यापि सौरभत्वसामान्यलक्षणतो भानासंभवेन सौरभभाना
र्थमपि ज्ञानलक्षणया आवश्यकत्वात् । न च ज्ञानलक्षणजन्यतावच्छेदककोटौ
सामान्यलक्षणाजन्यज्ञाने व्यभिचारवारणाय तद्भिन्नधर्माप्रकारकत्वस्य निवेश
तया ज्ञानलक्षणतोपि कथं सौरभभानमिति वाच्यं । सामान्यलक्षणाघजन्यत्व
निवेशेनापि सर्वसामंजस्यसंभवादित्यत आह नवीनमते इति पूर्वोक्तयुक्त्या वस्तुतस्त्वि
त्यादिनोक्तयुक्त्या विशेष्ये प्रकारसाधारणविशेष्ये अनपेक्षणादिति सौरभमुख्यवि
शेष्यकचाक्षुषं प्रत्येव सौरभांशे लौकिकचाक्षुषसामग्र्या हेतुत्वस्योक्तत्वादिति भा
वः अन्ये तु सौरभत्वादेरपीत्यस्यायमाशयः सामग्र्यंतरपदेन लौकिकालौकिक
साधारणतद्धर्मप्रकारकबोधसामग्र्या एवोक्तत्वात् प्रकृते सौरभत्वप्रकारकलौकि
कचाक्षुषसामग्र्यभावेपि तत्प्रकारकोपनीतभानसामग्र्या एव सत्त्वेन तत्सहका
रेण सौरभत्वसामान्यलक्षणया सौरभभानसंभवति न च ज्ञानलक्षणयाः पृथ

कुप्रत्यासत्तित्वानभ्युपगमे कथमुपनीतभानसामग्र्याः सहकारित्वमिति वाच्यं। तदनभ्यु
पगमेऽपि तस्याः सामान्यलक्षणायाः सहकारित्वेन तदुपयोगाभ्युपगमात्। न चैवं तमंध
तमसइत्याघ्राणजबोधोदुर्वारः तत्रापि द्रव्यत्वप्रकारकोपनीतभानसामग्र्याः सत्वादिति
वाच्यं। द्रव्यत्वप्रकारकोपनयसत्वेऽपि विशेष्यभासकसामग्र्यास्तत्राभावेन तादृशा
पत्यभावात्। न च द्रव्यत्वप्रकारककोपनयविशेष्यीभूतस्यैव धर्मिणो विशेष्यन
यात ज्ञानसामग्रीतत्रास्त्येवेति वाच्यं। तदुत्तरं आलोकसंनिकर्षाभावेन लौकिकसा
मग्र्या उपनयस्य तन्मुख्यविशेष्यकचाक्षुषज्ञानोत्पादकत्वासंभवेनोपनीतभान
सामग्र्याः द्रव्यप्रकारकोपनयविशेष्यीभूतधर्मिविशेषणकज्ञानसामग्र्याश्च तद्धी
यविशेष्यांतरभासकलौकिकसामग्रीविरहेणासंभवात्। प्रकृते च चंदनं चक्षुःसंयोग
दशायां सौरभत्वप्रकारकोपनयविशेष्यीभूतधर्मिविशेषणकज्ञानसामग्र्या एव
सत्वात्। न चांधकारविशेष्यकद्रव्यत्वप्रकारकोपनीतभानसामग्रीतत्राप्यस्त्येवेति

प्र.व्या.टी.
१९

वाच्यं। तादृशज्ञानस्य भ्रमरूपतया दोषाभावेन तदुत्पत्त्यसंभवात् सति च दोषे इष्टापत्तेः। अ
त एवांधतमस इत्यादिग्रंथस्य च तादृशदोषाभावदशाभिप्रायकत्वादित्याहुः। केचित्तु
ज्ञानलक्षणायाः सामान्यतो लौकिकान्यतद्विषयताशालिप्रत्यक्षत्वावच्छिन्नं प्रति न
तद्विषयकज्ञानत्वेन हेतुता सामान्यलक्षणया अन्यातीतानागतादिज्ञाने व्यभिचारात्
नापि तत्प्रकारकप्रत्यक्षत्वावच्छिन्नं प्रति तथा। उपनीतस्य मानसज्ञाने विशेष्यतायां
अभ्युपगमेन तस्यैवासंग्रहात्। न च तस्य सामान्यलक्षणयैवोपपत्तौ तदसंग्रहेन
क्षतिरिति वाच्यं। सौरभत्वेन घटादिमुख्यविशेष्यकचंदनादिप्रकारकोपनीतभानस्य
सामान्यलक्षणयैवोपपत्तौ तयाऽनिर्वाहात्। न च सौरभत्वविशेष्यस्य घटादेर्विशेष्य
तायां उक्तज्ञाननिष्ठविशेष्यतानिरूपितप्रकारत्वस्यापि संभवेन कथं तयाऽनिर्वाह इति वा
च्यं तादृशप्रकारत्वस्याननुभावात्। तस्मादेतत्सौरभवृत्ति धर्मप्रकारत्वानिरूपि
ते तत्सौरभवृत्ति लौकिकान्यविषयताशालिप्रत्यक्षत्वावच्छिन्नं प्रत्येव तत्सौरभ राम १९

ज्ञानत्वेन ज्ञानलक्षणायाहेतुत्वं वाच्यं एवं च सौरभत्वेन सौरभप्रकारकचाक्षुषादेर्न
त्र लक्षणत्वोऽनिर्वाहित्वं सामान्यलक्षणायाः सौरभत्वप्रकारतानिरूपित
सौरभप्रकारताशालिप्रत्यक्षंप्रतिकारणत्वांतरं लक्ष्यं तत्र तदिंद्रियकरणकत्वधर्म
प्रकारकोपनीतभानसामग्रीसहकारित्वं ईदृश्यं चक्षुरभिवंतन्नमित्यादौ सौरभत्वी
पनयघटितसौरभत्वीयलौकिकान्यतादृशविषयताशालिप्रत्यक्षसामग्रीरूप
सहकारिवशात् सामान्यलक्षणतः सौरभभानं संभवतीसत्ता। सौरभत्वपर्य
तानुधावनं। एवं सौरभत्वप्रकारतानिरूपितलौकिकविशेष्यताशालिप्रत्यक्षं
प्रति सौरभत्वज्ञानस्यहेतुत्वांतरं कल्पनीयं तत्र लौकिकत्वादिंद्रियकरणकत्वध
र्मप्रकारकज्ञानसामग्रीसहकारित्वी तादृशसामग्र्याः सहकारित्वानभ्युपग
म एवांधतमसइत्यादिनां चाक्षुषापत्तिर्दर्शितेति तन्नु सर्वमिदं ज्ञानस्यप्रत्यास
त्तित्वे एवसंभवति तदनभ्युपगमे सौरभत्वप्रकारकज्ञानसामग्र्यंतराभावात् सौरभ

भवानं.टी.
२०

20

ज्ञानस्यापि सामान्यलक्षणत्वासंभवे सौरभत्वपर्यन्तानुधावनमयुक्तमेवेति चेन्न सौ
रभत्वप्रकारतानिरूपितसौरभप्रकारताशालिज्ञानजनने सामर्थ्यं तस्य सहका
रित्वाभ्युपगमात् किं चैवं ज्ञानविधयैव परं सौरभज्ञानस्यापेक्षणीयत्वात्
अत एव सौरभज्ञानस्य न्यूनताप्रसङ्गावसौरभत्वस्य यथा कथंचिदुपस्थितौ चंदना
दिसंनिकर्षेऽपि सामान्यलक्षणजन्यचाक्षुषोपपत्तिरिति वदंति। सौरभत्वादेरि
त्यादिना सौरभपरिग्रहस्यापि कश्चित् सुरभिचंदनमित्याकारकमानसज्ञानाभिप्रा
येणेदमित्यन्येषु सुरभिचंदनमित्यस्य सौरभचंदनमित्यर्थ इत्यपरे तन्नावगाहिस्मरण
राम
मूलके उपनीतभाने पुष्कलीभूतज्ञानात्मकधर्मस्य ज्ञानेन सामान्यलक्षणयैवमुन्ने
२०
भोत्वं संभवतीत्यत आह प्रमुष्टतत्ताकेति पुरोऽस्यविभानमिति। यत्तु तत्र स्मरणमूल
भूतभ्रमात्मकप्रत्यक्षे सामान्यलक्षणपारजतस्यापि भानात् तस्यापि स्मरणा
संभवेन स्मरणजन्यमानसे पितस्यैव भानोपगमेन मुक्तेर्भानम प्रामाणिकं पु

क्ति इत्ति धर्मस्मरणस्य तत्र एव शुक्तिभानोपगमादिति नवीनानां दूषणं । प्राचां तच्चिन्त्यं
। यत्र किंचित्प्रतिबंधकवशेन तादृशप्रत्यक्षे सामान्यलक्षणया रजतस्यापि
भानं तत्रापि तन्मूलकस्मरणमूलके उपनीतभाने शुक्तिभानस्यानुभवसिद्ध
तया शुक्तिधर्मस्मरणस्य तत्र एव शुक्तिभानोपगमादित्यस्य सर्वापत्तिनिरर्थत्वात् ।
यद्यपि तत्र रजतत्वसामान्यलक्षणबलादेव शुक्तिभानोपपत्तौ किं ज्ञानलक्षण
यात्र च रजतत्वसामान्यलक्षणया रजतत्वाश्रयप्रत्यक्षं प्रत्येव हेतुतया कथं त
दत्वाद्रजतत्वानाश्रयशुक्तिभानमिति वाच्यं । न च्यमते निर्विकल्पकात्मकज्ञानस्या
पि सामान्यप्रत्यासन्नितया तज्जन्यतावच्छेदकसंबंधविशेषानिवेशेन समवायाव
च्छिन्नरजतत्वप्रकारताशालिज्ञानादपि कालिकसंबंधेन रजतत्वाश्रयीभूतशुक्तिभा
नोपपत्तेरिति न च तत्रैरूप्ये तदपि न सम्यक् । एवमपि एककालीनत्वादेः संबंधत्वे
मानाभावेन यत्र रजतत्वेन नित्यविषयकतथाविधज्ञानं तत्र ज्ञानलक्षणं वि

नागस्य भावात् । न च दोषबलादेव तत्र रजतत्वेन निष्प्रभानमिति वाच्यं । प्रत्यक्षस्य विषय
त्वस्य संनिकर्षाश्रयत्वव्याप्यतया निर्दोषसंनिकर्षं विना प्रत्यक्षविषयत्वासंभवा
दिति अपरे तु अपेक्ष्यणीयवेत्यादिति धिति ग्रंथस्य व्याचक्षते । तथाहि । घटत्वा
दि प्रकारकज्ञानविशेष्ये लौकिकसंनिकर्षो घपगमेयान्न चक्षुरादि विषयकचाक्षुषा
दि वारणाय आहापेक्षणीयं चेति तद्धर्मप्रकारकज्ञाने तदिंद्रियजन्यतद्धर्माश्रय
प्रत्यक्षजनने तदिंद्रियकरणकतद्धर्मप्रकारककिंचिज्ज्ञानजनकतावच्छेदकीभूता
न्तसामान्यज्ञानत्वातिरिक्ता यावंतो धर्मा अस्येकं तदवच्छिन्नस्तोमात्मकसामग्र्यं
तरस्य विशेषसामग्रीमुद्रया सहकारित्वं कल्पनीयमित्यर्थः । तदिंद्रियजन्यफल
जनने अन्येंद्रियकरणकज्ञानसामग्र्या अनपेक्षणात्तदिंद्रियकरणकेति धर्मा
न्तरप्रकारकज्ञानसामग्र्यंतरसत्त्वेपि तद्धर्मप्रकारकज्ञानसामग्र्यंतरव्यक्ता
त्वेन तद्धर्माश्रयप्रत्यक्षानुदयात्तद्धर्मप्रकारकेति । घटत्वज्ञानत्वनिष्ठत्वज्ञानत्वादी

नाम्यपि समूहालंबनात्मकघटत्वादिप्रकारकज्ञानजनकतावच्छेदकतया तद्दुरितया
वद्धर्मावच्छिन्नानां चकराद्यसत्वाद्याकिंचिदिति घटत्वज्ञानत्वाद्यवच्छिन्नस्य घटत्वज्ञा
नाद्यसहकारितया तत्सामान्यज्ञानत्वातिरिक्ता इति तादृशज्ञानजनकतावच्छेद
कीभूतात्मत्वादिरूपयाकिंचिद्धर्मावच्छिन्नस्य सर्वदैवसत्वाद्यावत्त इति। एवं च घट
त्वप्रकारकयत्किंचिज्ज्ञाननिष्ठकार्यतानिरूपितकारणतावच्छेदकीभूतघटत्वज्ञा
नत्वातिरिक्ता यावंतो धर्माः प्रत्येकं तदवच्छिन्नकूटसमवहितं घटत्वज्ञानत्वावच्छिन्नं
यद्यावन्न कारणतावच्छेदकसंबंधेन तदवच्छिन्ने नरस्थाणौ तत्र कार्यतावच्छेदकसं
बंधेन कार्यतावच्छेदकावच्छिन्नमित्येवं सामग्रीव्याप्तिः स्वीकरणीया विशेष्यभास
कलौकिकसंनिकर्षादिघटितस्यकाले तादृशयावद्धर्मान्तर्गतचक्षुःसंयोगत्वावच्छि
न्नासत्वान्न घटत्वादिज्ञानाद्यादिप्रसक्त्यापत्तिः अतएव उक्तसामग्र्या अयोग्यत
त्वादेव अन्यथा तत्सामग्र्याश्रयचाक्षुषत्वाद्यवच्छिन्नं प्रति चक्षुःसंयुक्तविशेष्यकत्व

सामान्यप्रकारकचाक्षुषत्वादिना हेतुत्वोपगमे पुनरस्य त्वेचाक्षुषः संयुक्तविशेष्यकद्रव्य
त्वादिप्रकारकचाक्षुषसत्त्वेन निखिलद्रव्यचाक्षुषापत्तेर्वारणासंभवात् सौदामि
नीसंपातेति आलोकसंयोगस्यात्यंतास्थिरत्वप्रतिपादनाय द्रव्यप्रत्यक्षे। द्रव्यत्व
प्रकारकचाक्षुषे चरमं। आलोकसंयोगनाशानंतरं। तदानीं मानसनिखिलद्रव्य
प्रत्यक्षयोर्द्वयाद्वाचाक्षुषइति। अननुव्यवसीयमाने क्वचित्साक्षात्कारोपगमे प्रतिवि
रहाद्वाह संतानइति ननु सामान्यप्रत्यासत्तेर्ज्ञानात्मकत्वे ज्ञानप्रत्यासत्तितोऽस्या
भेदानुपपत्तिरत आह। इयंचेति। इयं सामान्यप्रत्यासत्तिः धर्मिणं प्रत्यासत्तिः स्वविष
यधर्माश्रयनिष्ठस्वविषयीभूतघटत्वादिरूपप्रत्यासत्त्या साक्षात्कारजनिका। इत
राज्ञानलक्षणप्रत्यासत्तिः स्वविषयधर्माश्रयनिष्ठस्वविषयीभूतघटत्वादिरूप
प्रत्यासत्त्या साक्षात्कारजनिका। इतरा ज्ञानलक्षणप्रत्यासत्तिः तस्यैव प्रत्यासत्ति
रित्यन्वयः स्वविषयधर्मनिष्ठकारणतावच्छेदकसंबंधभेदेन कारणताभेदाद्वेदभेद

व्यवहार इति भावः। ननु ज्ञानलक्षणायाः प्रत्यासत्तित्वे मानाभावः घटो नास्ति सुरभिचं
दनमित्यादौ घटसौरभादीनां ज्ञानस्य घटत्वसौरभत्वसामान्यलक्षणत एव नि
र्वाहात्। न च सामान्यलक्षणया फलजनने तद्धर्मप्रकारकप्रत्यक्षजनकसाम
ग्र्यंतरस्यापेक्षितत्वात् घटो नास्ति सुरभिचंदनमित्यादौ घटत्वसौरभत्वादिप्रका
रकप्रत्यक्षजनकलौकिकसंनिकर्षाद्यभावात्। सामान्यलक्षणातो घटादिभान
मनुपपन्नमिति वाच्यं। लौकिकसंनिकर्षासत्त्वेपि घटत्वादिप्रकारकोपनीतभा
नात्मकयत्किंचिज्ज्ञाननिष्ठकार्यतानिरूपितकारणतावच्छेदकीभूतयावद्धर्मा
वच्छिन्नस्तोमात्मकसामग्र्याः सत्त्वेनानुपपत्त्यभावात्। न च तद्धर्मप्रकारकोप
नीतभानात्मकयत्किंचिद्व्यक्तिजनकतावच्छेदकीभूतयावद्धर्मावच्छिन्नसमवधा
नस्य तद्धर्मज्ञानसहकारित्वे घटो नास्ति सुरभिचंदनमित्यादौ अनुपस्थितघटसौ
रभादीनां भानप्रसंग इति तत्प्रकारकलौकिकप्रत्यक्षसामग्र्या एव सहकारित्वे

कल्पनीयमितिवाच्यं । तदानीमनुपस्थितघटसौरभादीनां प्रकारतया भानस्य विरो
धेन ज्ञानविरहेण मुख्यविशेष्यतया तज्ज्ञानस्य च तद्धर्मप्रकारतानिरूपितलौकि
कविषयताख्यस्याप्रसिद्ध्या तद्धर्मप्रकारतानिरूपितलौकिकविषयताशालि
नो लौकिकसंनिकर्षस्तत्प्रकारेण विरहेण पाद्यासंभवात् । अपि तु तत्प्रकारक
प्रत्यक्षत्वावच्छिन्नं तन्मुख्यविशेष्यकप्रत्यक्षत्वावच्छिन्नं वा नापाद्यते किं तूपनीत
भानात्मकघटत्वप्रकारकज्ञानरूपफलं किंचिद्व्यक्तिजनकतावच्छेदकयावद्धर्मा
वच्छिन्नसमवहितघटत्वादिज्ञानस्य स्वविषयीभूतघटत्वादिरूपप्रत्यासत्त्या याव
द्घटादिष्वेव सत्त्वात्तत्र तज्जन्यतावच्छेदकीभूतघटत्वादिप्रकारतानिरूपितविशेष्य
त्वप्रत्यासत्त्या प्रत्यक्षत्वावच्छिन्नमापाद्यते तत्र च तत्तद्घटादिरूपविशेषणज्ञाने
स्य घटत्वादिप्रकारतानिरूपितलौकिकविषयताशालिज्ञानसामग्र्या अभावे

रहेऽकिंचित्कारः तद्विरहेऽपि घटत्वादिप्रकारतानिरूपितविशेष्यताप्रत्यासत्त्या प्रत्यक्षस्योपसि-
त घटादौ घटत्वज्ञानेन जननादिति चेन्न तद्धर्मिनिष्ठविशेष्यतासंबंधेन प्रत्यक्षं प्रति स्वविषय-
धर्मनिरूपित~~लौकिकविषयता~~ तद्धर्मिनिष्ठाधिकरणत्वप्रत्यासत्त्यैव सामान्यज्ञान-
स्य हेतुताकल्पने। एवं च तद्धर्मिनिष्ठधर्मप्रकारतानिरूपितलौकिकविषयताशालिज्ञा-
नसामान्यसामग्री तद्धर्मप्रकारतानिरूपिततद्धर्मिप्रकारताशालिप्रत्यक्षसाम-
ग्र्यन्तरसहकृतं सामान्यज्ञानं स्वविषयधर्मनिरूपिततद्धर्मिनिष्ठाधिकरणत्वसंबं-
धेन यत्र तत्र तद्धर्मिनिष्ठविशेष्यतासंबंधेन प्रत्यक्षमित्येवं क्रमेण नानैव सामग्री-
याद्वयः स्वीक्रियंते तथा च घटे नास्तीत्यादावनुपस्थितघटादिभानापत्तिर्न संभवति
घटत्वादिप्रकारतानिरूपितलौकिकविषयताशालिज्ञानसामग्री घटत्वादिप्रकारता-
निरूपिततत्तद्घटादिप्रकारताशालिप्रत्यक्षसामग्र्यन्तरसहकृतघटत्वज्ञानस्य
तत्तद्घटनिष्ठस्वविषयधर्माधिकरणत्वसंबंधेन तत्रासत्त्वादिति अत्र च तत्तद्धर्मिमे-

भवानं॰ पी॰ २४

देन सामान्यलक्षणयाः कारणतावाहुल्यप्रयुक्तं गौरवमिति तु नाशंकनीयं तत्तद्धर्मिभे
देन भिन्नभिन्नकारणताकल्पने घटत्वद्रव्यत्वादिरूपनिखिलसामान्यज्ञानानां सो
न त्वेनैकैकहेतुतायाएवकल्पनात् सामान्यभेदेन कारणतावाहुल्याभावात् भ
वन्मते च सामान्यभेदेन विभिन्नकारणताकल्पनमावश्यकं विशेष्यतासंबंधेन प्र
त्यक्षं प्रति स्वविषयधर्मवत्वसंबंधेनैकहेतुताकल्पने घटत्वाज्ञानकाले घटत्वप्र
कारतानिरूपितलौकिकविषयताशालिप्रत्यक्षसामग्र्या असत्वात् सत्यां च
घटत्वादिप्रकारतानिरूपितलौकिकप्रत्यक्षसामग्र्यां घटत्वेन यावद्घटप्रत्यक्षा राम
पत्तेः घटत्वादिप्रकारतानिरूपितलौकिकप्रत्यक्षसामग्रीसहकृतस्यापि ज्ञान २४
त्वावछिन्नस्य स्वविषयधर्मवत्वसंबंधेन प्रत्यक्षत्वावछिन्नव्याप्यतायाः स्वीकरणी
यत्वात् मन्मते तु तत्तद्धर्मिनिष्ठप्रत्यासत्याज्ञानत्वावछिन्नस्य येन संबंधेन तत्त
द्धर्मिवृत्तित्वं यो धर्मस्तत्संबंधावछिन्नतत्प्रकारतानिरूपितलौकिकविषयताशा

लिप्रत्यक्षसामग्रीसत्त्वे तस्यैव प्रत्यक्षत्वावच्छिन्नव्याप्यत्वोपगमात्तत्रातिप्रसंगाभा
वात् एवं च भवन्मते ज्ञानत्वव्याप्यतया अपि तत्तद्विषयभेदेन नानाकारणताः कल्प
नीयाः लौकिकाख्यविषयतासंबंधेन प्रत्यक्षत्वावच्छिन्नं प्रति विषयतासंबंधेन ज्ञान
त्वेनैकहेतुतायाः क्लृप्त्यानेन तद्घटज्ञानत्वव्याप्यतायां तद्घटस्य विशेष्यभासकसामग्र्यसत्त्वे
घटांतरस्य च विशेष्यभासकसामग्रीसत्त्वे तद्घटे लौकिकाख्यविषयतासंबंधेन प्रत्यक्षा
पत्तिः तद्घटविशेष्यभासकसामग्रीं विनापि प्रकारतासंबंधेन प्रत्यक्षत्वावच्छिन्नस्य
घटांतरशब्दाद्युत्पत्तेः घटांतरादिविशेष्यमात्रभासकसामग्रीसत्त्वे तस्यापि ज्ञानत्वा
वच्छिन्नस्वविषयनिष्ठप्रत्यासत्त्या प्रत्यक्षत्वावच्छिन्नव्याप्यतायाः स्वीकरणीयत्वा
दिति न च तत्र तत्तद्घटादिविशेष्यकमेव ज्ञानं तद्घटे लौकिकाख्यविषयतासंबंधेन आ
पतत्विति तत्रेष्टापत्तिरिति वाच्यं मानसाख्यज्ञाने उपनीतस्य घटस्य विशेष्यतया भा
नस्यानभ्युपगमादिति तस्मात् ज्ञानत्वव्याप्यविषयभेदेन हेतुत्वांतरकल्पना

वैशिष्ट्यासामान्यलक्षणाया एवतत्तद्धर्मिभेदेनकारणताकल्पनमनुचितं एवंचोपदर्शि
ताऽतिप्रसंगविरहात्तत्प्रकारतानिरूपितलौकिकविषयताशालिज्ञानसामग्रीवि
निर्मोकेणापिसामान्यप्रत्यासत्तेः फलोपधायकतायाः स्वीकरणीयत्वात्तत एव
घटेनास्तिसुरभिचंदनमित्यादौघटसौरभादेर्भानोपपत्तेः किंज्ञानलक्षणायाः पृ
थक्कारणतयेत्यतआह। अतएवेति अतएवज्ञानलक्षणा तएवनतुसामान्यलक्षणा
तः सौरभत्वादिरूपनिधर्मस्यतदानीमज्ञानात्। तथाचतद्भानोपपत्तये ज्ञानलक्षणायाः
पृथक्कारणत्वकल्पनमावश्यकमेवेतीतिकृतंपा। ज्ञवितेनसंयोगाजन्येत्यादि अत्र
निर्विकल्पकेव्यभिचारणाप्रथममजन्यांतंज्ञानलक्षणाजन्योपनीतभानेव्यभिचार राम २५
वारणाय द्वितीयमजन्यांतं अपरापरेति घटत्वस्पर्शत्वोभयातिरिक्तं निवेश्यघटत्वस्प
र्शत्वे तत्त्रितयातिरिक्तत्वादिकं निवेश्येत्यर्थः। तस्मादिति। अत्रकार्यतावच्छेदकसंबंधादि
कंपूर्ववदूह्यमेव। वस्तुतस्तु निरुक्तघटप्रत्यक्षं प्रतिघटत्वज्ञानत्वेनसमवायेन निरुक्तविष

यनिष्ठप्रत्यासत्त्या तद्धेतुताद्वयं आद्यहेतुतया पुरुषांतरीयज्ञानभानापत्त्यातिप्रसंगः द्वि
तीयहेतुतयाच प्रत्यक्षविषयत्वस्य संनिकर्षाश्रयत्वव्याप्यत्वरहस्यं । एवं च पुरु
षभेदेन नानंतहेतुतापीति ध्येयं । नन्वेवमयं घट इति लौकिकप्रत्यक्षस्य लौकिक
प्रत्यासत्तिसामान्यप्रत्यासत्त्युभयजन्यत्वापत्तिरत्रेष्टापत्तिमाह घटत्वनिर्विकल्पक
कृत्ति । तद्धटवृत्तीति सामान्यप्रत्यासत्तिजन्यज्ञाने व्यभिचारवारणाय अप्रकारकांतं
निर्विकल्पके व्यभिचारवारणाय जन्यांतं । तद्धट इति इदं च घटांतरे तद्धटवृत्तिधर्म
प्रकारकस्य तद्धटे तत्प्रकारकस्य प्रत्यक्षस्य तद्धटज्ञानजन्यतावच्छेदकाक्रांतत्वसं
पत्त्यर्थं तत्तावगाह्युपनीतभानस्य तत्तारूपसामान्यप्रत्यासत्तिजन्यत्वमेवेत्याश
येनाह प्रभृत्तत्ताकत्वेति । नासंगत इति पदत्वस्य कालिकसंबंधेन तद्धटवृत्तितया
तादृशोपनीतभानस्य कालिकसंबंधेन तद्धटे पदत्वाप्रकारकत्वादिति भावः अत्र
वदंति । प्रत्यासत्तयः द्विधा कारणतावच्छेदकसंबंधाः स्वातंत्र्येण कारणनिर्व

भवानं.टी.
२६
26

तत्राद्यकल्पे सामान्यज्ञानं वा ज्ञायमानं सामान्यं वा प्रत्यासत्तिरिति विकल्पो न संभव
ति संबंधघटकानामुभयथाप्यतीतत्वात् । अयं विकल्पस्तु द्वितीयकल्प एव अत एवा
तिरिक्तैवेति ग्रंथो द्वितीयकल्पमाश्रित्य कल्पद्वयेप्यतीताद्यप्रत्यासत्त्वेनुकथ्य
ते न संबंधेन तत्रेंद्रियसत्त्वं कथं वा प्रत्यासत्तेस्तत्र सत्त्वं विषयासत्त्वकालेपि तेषु ज्ञा
नादिविषयतास्वीकारवत् पदार्थांतराश्रयतायाः केनाप्यस्वीकारादिति । हेतोरेव
धूर्ववर्त्तित्वोपगमे न संबंधघटकस्यासत्त्वेपि नानुपपत्तिरित्यपरे इति दिक् व्या
प्तेर्नाशात्वेत्वित्यादिवक्ष्यमाणं होयाताहृदीधितौ धूमेत्यादिग्रंथव्याख्यायां लाघवा
दाहेति । नव्यास्तु धूमव्यापकवह्निसामानाधिकरण्यवृत्तिधूमत्वत्वेन व्याप्तिप्रका राम
रकज्ञानहेतुत्वे गुरुशरीरधूमत्वत्वविषयतायाः कारणतावच्छेदकघटकतया गौ २६
रवमिति तादृशवह्निसामानाधिकरण्यप्रकारकविशेषणतांतरविशेषितधूमत्वा
वच्छिन्नविषयकज्ञानहेतुत्वं लाघवात्सेत्स्यति तथा च सामान्यलक्षणयाः प्रत्या

सन्नित्वदुर्वारमतो लघुशरीरसर्वसाधारणमाप्यं तस्माद्वह्निमानितीत्याहुः अपरे तु
नेदं सम्यक् स्वस्वरूपतोधर्मितावच्छेदकीभूतधूमत्वे धूमविशेषणतायत्रस्य तादृश
सामानाधिकरण्यपारतंत्र्येण प्रकारताशालिज्ञानहेतुत्वेन धूमत्वत्वं विषय
तायाः अनिर्देश्यात्। अन्यथा रासभादिसाधारण्यवारणाय धूमत्वविशिष्टतादृश
सामानाधिकरण्यप्रकारकत्वस्य तथापि विशेषणीयतया धूमत्वत्व विषयता
निर्देशस्यावश्यकत्वात्। अपर्याप्त्यंशेन तादृशसामानाधिकरण्यप्रकारकत्वे स
ति धर्मितावच्छेदकतया स्वरूपतो धूमत्वावगाहित्वं निवेश्यं तदेति चेत् तुल्यं समा
पीत्याहुः वह्निमद्वृत्तीति न च गुरुमतेऽभावस्याधिकरणरूपतया वह्निमद्वृ
त्तित्वाभावस्यैकस्य न सर्वधूमसाधारण्यमिति वाच्यं। एतस्या मीमांसकोक्ते
स्तृतीयलिंगपरामर्श इत्यादिमूलपर्यालोचनया नैयायिकमतमवलंब्य प्रवृ
त्ततयाऽदोषात् अत एव केवलान्वयिसाधारण्यापत्त्याग्रिमग्रंथोपि संगच्छते अन्य

भवानं.टी.
२७
27

था मीमांसकानां केवलान्वय्यनुमानाभावेनासंगत्यापत्तेः एतेनायं ग्रंथो मीमांस
कीयोपि न गुरुमताभिप्रायकः उक्तानुपपत्तेः किंतु मुरारिमिश्रमताभिप्रायक इति न
वीनोक्तिरपि हेयैव साध्यसंबंधितेति नचैवमपि दंडादिरूपनानाहेतुतावच्छेदकस्य
ले पूर्वं गृहीतसाध्यसामानाधिकरण्यकावृत्तिपक्षवृत्तिदंडादावपूर्वसाध्यसामा
नाधिकरण्यावच्छेदकत्वग्रहानुरोधेन सामान्यलक्षणाश्रयणमुपेयेति वाच्यं । तत्र
साध्यसंबंधितावच्छेदकदंडत्वाद्यवच्छिन्नवत्वं व्याप्तिरित्याशयात् । दीधितौ ग्रहायोगा
दिति तथा च प्रत्यक्षस्य शाब्दादिसामग्र्यभावात् पूर्वमगृहीतत्वेन नैयायिकमतवत्वं व्या
प्यतयस्याप्यसंभवादिति भावः वह्निसामानाधिकरण्यत्वेनोपस्थितस्य महानसीसी राम २७
यवह्निसामानाधिकरण्यादेर्ग्रहोस्त्वत आह अन्यदीयेति पर्वतभिन्नीयेत्यर्थः अप्रमात्वाप
त्तिरिति मीमांसकैरन्यथाख्यातेरस्वीकारान्नेष्टापत्तिरिति भावः मीमांसकस्य सामा
न्यलक्षणां विनापि नैयायिकमतमवलंब्यानुमितिनिर्वाहात् तदनवलंब्यापि तां नि

र्वाऽयइति मूले तत्तनभ्युपगमेपीति तृतीयलिंगपरामर्शानभ्युपगमेपीत्यर्थः व्याप्त्य
नुभवतत्स्मरणेति कुत्रचिद्व्याप्त्यनुभवात् कुत्रचिद्व्याप्तिस्मरणादनुमितिरित्युभयो
रेव व्याप्तिज्ञानत्वेन हेतुत्वं अत्रेनुमितिहेतुत्वादित्यत्र हेतुत्वपदं वा प्रयोजकत्वपरं त
था च व्याप्तिज्ञानपक्षधर्मताज्ञानयोः समानप्रकारकत्वेनानुमितिहेतुत्वमिति
भावः समानप्रकारकत्वेनानुमितिहेतुत्वे दृष्टांतमाह गवादिपदेष्वपीति। नव्यास्तु
ननु सामान्यलक्षणानंगीकारेऽपूर्वगवादिव्यक्तेर्गवादिपदाच्छाब्दबोधानुपप
त्तिः शक्तिज्ञानपदार्थस्मरणयोस्तद्विषयकत्वानुपपत्तेः शक्तिग्रहपदार्थस्मरणयोर
न्यविषयकशाब्दबोधजनकत्वे सम्मतिप्रसंगादित्यत आह गवादिपदेष्विती
त्यानुस्तच्चिंत्यं। शाब्दबोधे शक्तिग्रहादीनां समानविषयकत्वेन हेतुत्वेप्यनुमितौ
परामर्शस्य समानप्रकारकतामात्रेण हेतुतया व्यवहाराधीनगवादिपदशक्त्य
नुमितौ गवादिपदात् पूर्वगवादिव्यक्तिभानसंभवेन सामान्यलक्षणानंगीकारे

भवानं.टी
२८
28

पिगलादिपदात्सर्वगवादिव्यक्तिशाब्दबोधानुपपत्तेरभावात् । एतेन शाब्दशक्तिग्रहा
धीनशाब्दबोधस्थल एवाश्वर्वगवादिव्यक्तिभानानुपपत्त्या तत्र सर्वगवादिव्यक्तिविषय
कशाब्दबोधस्यानुमीत्यात्मकशक्तिग्रहाधीनत्वोपगमेनैव निर्वाहे तत्र शाब्दशक्तिग्रहा
धीनत्वस्यैवासिद्धेः यदि च मीमांसकैः शाब्दबोधेपि समानप्रकारकत्वेन हेतुत्वमुपेय
त इति वस्तुगतिमनुरुध्य इत्युक्तमपि तु व्यतिरेकस्य दृष्टांतपरत्व एव पर्यवसान
मिति दिक् । शाब्दानुभवतत्स्मरणे मत्वर्थस्य शक्यपरं न तु प्रक्रांतशक्तिपरं तस्मात्स्म
रणमिति व्युत्पत्त्या तत्पदस्य शाब्दानुभवपरतया तत्स्मरणपदस्यैव वा शाब्दस्मरण
परं यथाश्रुते ज्ञानत्वेनैव शाब्दानुभवशक्तिस्मरणयोरुभयोरूपादानेसंभवे नानु
भवस्मरणयोः पृथगुपादानवैयर्थ्यात् पदार्थस्मरणस्य समानविषयत्वेन शा
ब्दबोधहेतुत्वात् एवं च नैतदनुरोधेन सामान्यलक्षणस्वीकारापत्तिः [illegible] इति मूल
स्य शक्तिग्रहपदार्थस्मरणशाब्दानुभवानां समानप्रकारकत्वमात्रेण हेतुहेतुम

राम
२८

ज्ञानावधारणमित्यादिनागोपदात्पूर्वंगवाननुभवं प्रसंगान्नेत्यंतेन ग्रंथेन व स्मृ
तइत्यर्थकस्यासंगत्वापत्तेरुक्तत्वाशयेनाह दीधितौ शाब्दानुभवशाब्दस्मरणइ
ति। स्मारकशाब्दांश शाब्दस्मरणयोरिति परस्परमिति शेषः अगृहीतग्राहित्वापत्तिः अ
गृहीतग्राहित्वेन प्रमात्वापत्तिः अगृहीतस्मरणस्यैव तन्नदनुभवविषयत्वेन धारा
वाहिकानुभवेऽव्याप्त्यभावेन तन्मतेऽगृहीतग्राहित्वस्यैव प्रमात्वलक्षणत्वादिति
भावः हेतुत्वाभावेऽपीति वृत्तिज्ञानजन्यपदार्थोपस्थितेर्हेतुतया शाब्दानुभवस्य हे
तुतावच्छेदकत्वादिति भावः लाघवात्पदज्ञानत्वेनैव हेतुत्व न तु गुरुणा पदार्थस्मृति
व्यापारकत्वेनेत्याशयेनाह काश्चिदिति। उभयोः शाब्दानुभवशाब्दस्मरणयोः
तदेवेतिगवादिपदेष्वित्यादिनामूलत्वेनेति शेषः दृष्टांतीकृतमिति। तथा च शाब्दा
नुभवशाब्दस्मरणयोः परस्परं कार्यकारणभावोऽप्यग्रे यत्कृतोऽभिमतः आपि
तु उभयनिष्ठशाब्दबोधकारणत्वं समानप्रकारकत्वेनेत्येवाग्रे यत्कृतो हृद्यमिति

भवानं·पी
२९
29

भावः केचित्तु ननु दृष्टांतेकारणयोः समानप्रकारकत्वेनासमानप्रकारककार्यप्रति
कारणत्वं दृष्टांते च कार्यकारणयोः समानप्रकारकत्वेति वैषम्यमत आह शाब्दत्वनु
भवेत्यादि तथा च कारणयोः समानप्रकारकत्वेन कारणत्वं दृष्टांतीकृतमिति वदंति।
भ्रमत्वापातादिति गोगौ पदशक्यो ति शक्ति ज्ञानस्यैव गोत्वप्रकारकशाब्दबोधसमा
नप्रकारकतया तस्य च शाब्दभावत्वात् व्यक्तौ शक्ति प्रकारकत्वादिति भावः कुलु
शक्तिवादिनो मीमांसकस्य मतमालंब्य समाधत्ते दीधितौ जातौ व्यक्तौ चेति। जाति
विशिष्टव्यक्तौ शक्तिकल्पने संबंधांशे शक्तिकल्पनं जातिव्यक्त्योर्विशेष्यविशेषण
भावे चि निगमनाविरहस्ते स्याशयेन विशिष्टशक्तिमुपेक्ष्य जातौ व्यक्तौ चेत्युक्तं। गो राम
त्वं तदादिपदशक्तिमत्त्व गोर्नेतदादिपदशक्तिमतीति ज्ञानवतस्तदादिपदाज्जोरनु २९
पस्थितेर्व्यक्तिपर्यवसानं धावनं। नु गोत्वसमवाये गोपदशक्त स्वीकारे शाब्दबो
धे संबंधे भाननियमो न स्यात् न चाकांक्षादिनैव संबंधभाननियमः स्यादिति

वाच्यं। तथासति नैयायिकमतेऽपि नैव संबंधभाननियमे तत्र शक्त्यस्वीकारेण नै
यायिकमताविरोधापत्तेरत आह परं त्विति ज्ञाने नेति शक्तिरित्यनुषज्यते । तदर्थोऽत्र
जातिशक्तिवादार्थो । जातिविषयत्वेनैवेत्यादेर्यथाश्रुते प्रकारत्वस्य तृतीयार्थतया
जातिविषयत्वप्रकारकशक्तिविशेष्यकज्ञानत्वेन हेतुता लभ्यते तत्र एतेनेत्यादिवक्ष्य
माणदोषापाताद् आह व्याख्यायां जातिविषयत्वेनैवेत्यादि गोत्वप्रकारकशक्तिज्ञानत्वे
नैवेति। एवकारेण व्यक्तिविषयकत्वेन शाब्दबोधप्रयोजकत्वव्यवच्छेदः तथा च शक्तिग्र
हे विषयिता यस्य शाब्दप्रयोजकत्वं तस्यैव वाच्यत्वमिति व्यक्तिशक्तिसत्त्वेऽपि न त
स्या वाच्यत्वमिति शङ्कते: कुत इति कुतः शक्तिवादिनां व्यक्तेः शाब्दबोधप्रयोजक
त्वाभावेन नैयायिकमताविरोध इति भावः एतेन कुत्र शक्तिवादिमते गोत्वप्रका
रकशक्तिज्ञानत्वेनैव हेतुत्वे जातिविषयकत्वे प्रकारकत्वस्य कारणतावच्छेदक
कोटावनिवेशेन तन्मते शाब्दकमते वक्ष्यमाणगौरवदोषस्यासंगत्यापत्तिरिति दू

घत्ते ज्ञापनं परास्तं। वक्ष्यमाणगौरवहीनस्य यद्विषयकत्वे शाब्दबोधप्रयोजकत्वं तस्यै
व वाच्यत्वमिति नियमकल्पनाल्लघुगौरवपरत्वे नासंगत्यभावात्। समानप्रकारक
त्वविरोध इति। इत्युपलक्षणं वक्ष्यमाणजातिविषयकत्वज्ञानानुपपत्तिरपि द्र
ष्टव्या न चोक्तशक्तिग्रहस्य शाब्दांशे शाब्दधीप्रकारगोत्वप्रकारकत्वेन कथं विरोध
इति वाच्यं। यथा कथंचित्समानप्रकारकत्वोक्तावपूर्ववादेऽपि लिङ्‌शक्तिग्रहस्य कार्यत्व
प्रकारकं शाब्दघटादिविशेष्यकस्य कार्यत्वप्रकारेणापूर्वशाब्दे हेतुत्वस्य वक्ष्यमाण रा म
त्वेन इत्यपूर्ववक्ष्ये तद्रुतिमूलं विरोधापत्त्याशंकायांशे शाब्दधीप्रकारप्रकारकत्वेन ३०
यसमानप्रकारकत्वस्यैव वाच्यतया तद्विरोधस्य दुर्वारत्वात्। शाब्दबोधीयसमवाय
संबंधावच्छिन्नगोत्वप्रकारतातोशक्तिग्रहोपनिरूपितत्वसंबंधावच्छिन्नगोत्वप्रका
रताया विलक्षणत्वात्। एतेन समवायेन गोत्वप्रकारकशाब्दं प्रतिशक्तिसंबंधेन
गोत्वप्रकारकगोपदविशेष्यकगोपदं गौरित्याकारकशक्तिज्ञानत्वेन हेतुत्वोक्तौ न

कोपि विरोध इति जातिशक्तिवादविरोध इति दीधितिरसंगतेतिमैथिलोक्तावितद्दूषण
मपि निरस्तं। तस्यापि शक्यांशे गोत्वप्रकारकत्वात् एतद्बोधीयसमवायसंबं
धावच्छिन्नगोत्वप्रकारतातोपशक्तिज्ञानीयशक्तिसंबंधावच्छिन्नगोत्वप्रकारता
या विलक्षणत्वाच्च। जातिविषयकत्वज्ञानानुपपत्तिरिति शक्तिविशेष्यकजाति
विषयकत्वप्रकारकज्ञानानुपपत्तिरित्यर्थः उपदर्शितरीत्या जातिविषयकत्वेनैव तस्या
दि यथाश्रुतग्रंथेन तादृशज्ञानस्यैव हेतुतालाभादिति भावः। नितरामेवेति जा
ति विषयकत्वज्ञानानुपपत्तिरित्यनुषज्यते उक्तशक्तिग्रहे शक्तिविशेष्यकत्वसत्वे
पि न जातिविषयकत्वप्रकारकत्वमत्र तु न शक्तिविशेष्यकत्वमपीत्याशयेन नि
तरामित्युक्तिः। निरस्तमिति। तथा च कुत्र शक्तिमते गोगोपदशक्येति शक्तिग्र
हस्यैव गोत्वप्रकारकशक्तिज्ञानत्वेनैव हेतुतेति भावः अत्र केचित् तास्य तेरगृ
हीतया हि त्वापत्त्या शक्तिज्ञानस्य समानविषयकत्वेनैव स्यादिति हेतुत्वमित्याशङ्क्य

भवानं॰टी॰ नुभवशाब्दस्मरणे हेतुः इति पूर्वग्रंथ्यात्प्रतीयते इदानीं च भ्रान्तिविषयकत्वेनैव ज्ञातार्थ
३१ शक्तिं स्मारयतीत्यनेन शक्तिज्ञानस्य समानप्रकारकत्वेनैव स्मृतिहेतुत्वमुच्यत इति
पूर्वापरग्रंथविरोधात्सुचिंत्यमेतदिति चेदंति। तत्सत्य स्मारयतीत्यनेन स्मृतिहे
तुत्वं समानप्रकारकत्वेनेति नोच्यते किंतु अनुभावयतीत्यनेनोक्तं शाब्दबोधहेतुत्वं
वृत्तिज्ञानजन्यपदार्थोपस्थितेर्हेतु तथा शक्तिज्ञानस्यानुभवजनकतावच्छेदक
तयानुपपन्नमित्याशंकानिराकरणाय स्मारयतीत्यनेन स्मृतिद्वारानुभावकत्वो
क्त्या जनकजनकतावच्छेदकसाधारणप्रयोजकत्वरूपानुभावकत्वं शक्तिज्ञानस्य सं
भवतीत्येतावन्मात्रप्रतिपादने न पूर्वापरविरोधाभावात्। एतेन भ्रान्तिं स्मारयतीत्य रा॰म॰
नुपयोगित्तत्र पूर्वपद्याकरणं त्वा। किं च मूलोक्तसमानप्रकारकत्वस्य निरूपित ३१
त्वसंबंधेन शक्त्यंशे शक्तिसंबंधेन पदांशे बोधप्रयत्न तया भ्रान्तिप्रकारेण भ्रान्तो श
क्तिग्रहस्य प्रागकथने न च एवं भ्रान्तिशक्तिवादविरोध इत्यप्यसंगतमित्यपि केचां

चिद्दूषणे ज्ञातवन्तं परास्तं स्मारयतीत्यस्योक्तरीत्यानुभावयतीत्येतदुपपादकतयोपयो
गित्वात् । पूर्वोपदर्शितरीत्याशक्यांशे समानप्रकारकत्वस्यैवाबोधेऽपि तत्तयाशक्यांशे पदांशे वा स
मानप्रकारकत्वस्य किंचित्करत्वेन व्यक्तौ शक्तिग्रहस्य शाब्दतः प्रागकथनेऽपूर्वतः शाब्दप्रमा
त्रु । तार्किकवच्च वह्निर्निरस्तु ननु जातिशक्तिवादिनां मीमांसकानां मते व्यक्तिरपि ... त्वभ्यान
नु शाब्दबोधविषय इति तत्कथं समानप्रकारकत्वेनापि तन्मते शक्त्यनुभवशक्यस्मरणयोः
शाब्दबोधं प्रति कार्यकारणभावः कथं वा शाब्दबोधे योग्यतावलादपूर्वव्यक्तिलाभ इत्युक्त
मित्याशंक्य नेतीधितेनचैव मिति । एवं शाब्दबोधेऽपि व्यक्तिविषयतास्वीकारे तत्र शोवरशाब्द
बोधजनकत्वविशेषस्यैव तत्वच्छेदकत्वरूपतया व्यक्तौ वपि शक्तिस्वीकारादितिभावः समा
दि९ धत्ते जातौ व्यक्तौ चेत्यादिना । अयं भावः तन्मते घटत्वादि[illegible] जातिप्रकारकशक्तिज्ञानत्वे
न कारणता नैयायिकानां तु घटत्वादिविशिष्टघटविषयकशक्तिज्ञानत्वेन कारणत्व
मित्येव जातिशक्ति जातिविशिष्टशक्तिवादयोः स्वर्थाद्भ्रामे दोनतु शाब्दबोधे व्यक्तिर्न भास

भवाने.पी.

३२

32

तदुक्तिस्तन्मतं तत्रैकदेशिनामेव तत्स्वीकारादिति वदन्ति तच्चिन्त्यं मीमांसकमते व्यक्तेः समान
वित्तिवेद्यत्वरूपार्थे पत्लभ्यत्वेपि शाब्दबोधविषयत्वाभावाभावेनोक्तरीत्यावतारस्यानु
त्थानात् । अपरे तु जातिविषयकत्वेनेवेति जातिविषयकत्वप्रकारेणैवेत्यर्थः तृतीयार्थ
प्रकारित्वे अन्वयश्चास्य ज्ञातेत्यत्र ज्ञानेतत्याच्च गोत्वविषयकगोपदशक्तिमतीगोरित्या
कारकधीरेव हेतुर्न तु गोत्वविशिष्टविषयकगोपदशक्तिमतीगोरितिधीरिति जातिशक्ति
वादार्थ इति भावः । न च विषयकान्तरवैयर्थ्यमिति वाच्यं । अस्येवैतन्मते रोजत्वात् । शक्तेर्न
गोत्वविषयिकेति बाधकाल्लेशाद्बोधापत्त्यातत्सार्थक्यात् । न चैवं शक्तेर्न व्यक्तिविषयि
केति बाधकाल्लेशाद्बोधापत्त्या व्यक्तिविषयकत्वमपि विशेषणं देयमिति वाच्यं । गोविशे राम
षणतापन्नगोत्वविषयकत्वविशेषणेनैवानेशात् ।। न च नैयायिकैरपि तादृशबाधकाले ३२
तद्दापत्तिवारणाय तादृशविशेषणप्रक्षेपे तन्मताविशेषतादवस्थ्यमिति वाच्यं । गोप्रका त्व २
कारेण तज्ञो विशेष्यकशक्तिज्ञानाद्रूपेणैव शाब्दबोधोदयेन तज्ञो विशेष्यकत्वस्यापि

विशेषणतयाविशेषसंभवादितिवदंति। केचित्तुशब्दानुभवइत्यादिमूलग्रंथोनानुभवस्यानु
भवविधेयताकारणतावोधकः किंतुउद्बोधकविधयातद्बोधकः तथाचोद्बोधकस्यसमानप्र
कारकत्वेनहेतुत्वेप्यनुभवस्यसमानविषयकत्वेनैवहेतुतयानस्मृतेरगृहीतग्राहिता
पत्तिरितिनकश्चिद्दोषइतियथाश्रुतमेवमूलंसाधुस्यादितिसंक्षेपः नियतसंस्थान
व्यंग्यस्यैवजातित्वनियमेमानाभावादाह हाहउद्बोधः श्रवसीतितद्गुणसंविज्ञानेतिअ
न्यथाऽपूर्ववादेलिङ्पदवत्तगवादिपदमात्रस्यापिसमानप्रकारकत्वेनहेतुत्वस्यवक्तव्य
ताकारणत्वेनतत्रसंगत्यापत्तेरितिभावः अपूर्वेगवानुभवप्रसंगात्तत्रपूर्ववादप्रया
संगतिः स्वरीतित्यागश्चात्रास्वरसइत्याशयेनाहदीधितौकश्चिदिति। विशेषणत्वा
नुसाध्येत्यादिमूलस्यसंविशेषणिकायाधीः सांस्वविशेषणज्ञानसाध्येतिव्या
ख्यातास्यर्थकतयासामान्यलक्षणज्ञानसाध्यत्वेनसिध्यतीत्याशयेनशंकतेनचे
ति। व्याख्यायांविशेषणत्वादिति। तथाचसामान्यलक्षणानंगीकर्तॄणामनुमितौप
राभर्गादिरूपस्यस्वविशेषणपर्वतत्वादिज्ञानस्यहेतुतायाअंगीकारेणसामान्य

त्वहुपणनसिध्यतीतिभावः दीधितौ यद्विशिष्टेति यत्प्रकारकेत्यर्थः विशेषणधीजन्यता
वच्छेदकं च प्रकारत्वं न नित्यज्ञान इति न तत्र व्यभिचारः सामान्येति। यत्तत्तद्रूपसामा
न्यघटितेत्यर्थः। नन्वभावत्वप्रतियोगित्वयोर्निर्विकल्पकानुपगमेनाघटत्वप्रकारक
प्रत्यक्षस्यैव व्यभिचारान्नोक्तनियमः साधीयानत आह अभावत्वेति। अत्यान्तत्वाभावाद्वि
दृशः। अप्रकारत्वादिति प्रकारत्वानुपगमादित्यर्थः तथा च प्रतियोगित्ववदभावत्व
स्यापि जात्यभावतः संबंधविधयैव भानमितिभावः। यत्तु घटो नास्तीत्यादिविशिष्टबुद्धि
पूर्वमभावत्वस्यापि निर्विकल्पकोपगमात्प्रतियोगितायाः संसर्गतयैव तत्र भाना
संभव इतिभावः नन्वेवं घटत्वाद्यप्रकारकस्य घटादिप्रत्यक्षस्यानुभवाद्घटत्वादेर
प्यनुपस्थितस्यैव प्रकारत्वापत्तिः न च प्रमेयत्वादिना घटत्वादिज्ञानेपि घट इत्यादि
ज्ञानविरहात्तत्र स्वरूपतो विशेषणज्ञानं हेतुरिति वाच्यं। प्रकृतेपि तुल्यत्वादत आह प
त्वतत्त्वेति। यत्रेति। तन्मत इत्यादिः तेन गुरूणां न्यथाख्यात्यनभ्युपगमेपि नासंगतिः
दीधितौ तज्ज्ञानेति वह्निज्ञानेति तद्वह्निज्ञानेति वार्थः अत्र वन्ह्यादिज्ञाननिष्ठजन्म

कृता निरूपितजन्यत्वस्यैव साध्यत्वं न तु तादृशज्ञानत्वावच्छिन्नजनकताघटितस्य गुरुमते ऽप्रसिद्धेः
अत एव गुरुमतसिद्धविशेषणतावच्छेदकवह्नित्वादिप्रकारकज्ञानत्वावच्छिन्नजन्यतात्वेन ता
दृशज्ञानजन्यत्वप्रसिद्धेव साजन्यताखंडनीयेति ध्येयं । अभ्युपगमवादः न्यायनयाभ्युपग
मेन वादः गुरुमते आह वस्तुतइति । अनुमित्यादिस्त्विति । तादृशइति लिंगविपरिणामे
नानुषज्यते । आदिनाशब्दबोधपरिग्रहः । व्याख्यायां व्याप्त्यादिग्रहइति दीधितिस्थव्या
प्त्यादिग्रहइति दीधितिस्थव्याप्त्यादिग्रहादित्यस्य विभक्त्यंशं विहाय प्रतीकधारणं आदि
नाशक्तिपरिग्रहः इत्यर्थः इति भावार्थः । अभ्युपगमवादत्वे बीजमाह दीधितौ वत एवेति
। विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकज्ञानस्य गुरुमते हेतुत्वाभावादेवे
त्यर्थः ऽव्याहीति दंडादित्यर्थः क्वचित्तथैव पाठः तज्ज्ञानार्थं । विशेषणतावच्छेदकाप्रवि
ष्टं दंडादिविषयत्वार्थः । व्याख्यायां हेतुत्वं कल्पनीयमिति तथा च दंडिमानित्यनुमितौ विशे
षणतावच्छेदकीभूतप्रकृते दंडभानार्थं सामान्यलक्षणस्वरूपकीति भावः नन्वप्रत्यक्ष

मात्रहेतुतायां तद्विशेषणादिविषयतानिवेशेपि सामान्यलक्षणया असिद्ध्यांव्याप्तस्य निवे
शाकृत्यन्यस्यानुपयोगापत्तिरत आह प्रत्यक्षस्येत्यादि ध्येयमित्यंतएको ग्रंथः । इ
ति निरस्तं । इत्यपि निरस्तं । एतेन विशिष्टवैशिष्ट्यबोधत्वस्य विशेषणतावच्छेदकप्रकार
कनिश्चयजन्यतावच्छेदकत्वे तादृशस्मरणे व्यभिचारः । अनुभवत्वजातौ मानाभावेन
तथाविधानुभवत्वस्यापि कार्यतावच्छेदकत्वाभावादित्यतः प्रत्यक्ष इत्युक्तं तथा च त
थाविधप्रत्यक्षत्वमेव तस्य कार्यतावच्छेदकमिति भाव इत्यपि परास्तं । उपदर्शितापत्ते
दुर्वारत्वात् । न च स्मरणे व्यभिचारः विशिष्टवैशिष्ट्यविषयतायास्तत्रानभ्युपगमात् ।
दीधितौ दंडत्वादिनेति ज्ञानकारणस्येत्यग्रिमेणान्वयः यत्किंचिदिति ननु फलीभूत
धीविषयव्यक्तिज्ञानमपेक्षितमिति भावः । ननु विशेषणज्ञाननिष्ठहेतुताकत्वसाधने
सिद्धसाधनेपि विशेषणज्ञानत्वावच्छिन्नहेतुताकत्वसाधने न दोष इत्यत आह मूले न
तु विशेषणज्ञानमपीति विशेषणज्ञानत्वावच्छिन्नमपीत्यर्थः तथा विशिष्टज्ञानहेतुः

तथा च साध्याप्रसिद्ध्यानानुमानमिति भावः। ननु निर्विकल्पकमिति तथा च व्यभिचाराद्वि
शेषण ज्ञानहेतुत्वं बाधितमिति भावः शंकते विशिष्टेति। प्राथमिक इंद्रत्व विशिष्टधी
स्तत्र ज्ञानपूर्विका तद्विशिष्टज्ञानत्वादित्यनुमानमेव निर्विकल्पके मानमिति शंकाा
र्थः तत्र च विशिष्टज्ञानत्वं यदि विशेषण ज्ञानपूर्वकत्वव्यभिचारि स्यात् विशेषण ज्ञा
नत्वावच्छिन्न जनकतानिरूपित जन्यतावच्छेदकं न स्यादित्यनुकूलतर्कः स एव नानुपसं
भवतीति विशेषण ज्ञानत्वेन हेतुत्वस्यैवासिद्धेरित्याशयेनाह दृष्टांताभावादिति विशे
षण ज्ञानत्वावच्छिन्नहेतुताकत्वेन निश्चिताभावादित्यर्थः तथा चाप्याप्रसिद्धिरि
ति भावः दृष्टांताभावादित्यत्र हेतुं पूरयति इदीधितौ विशेषणेति हेतुत्वस्येति निरस
त्वादित्यग्रिमेणान्वयः। आरब्धायां विशेष्यज्ञानादौ स्यादिनेति इदं च दीधितौ विशे
~~षणेति। हेतुत्वस्येति निरस्तत्वादित्यग्रिमेणान्वयः आरब्धायां विशेष्य सप्तम्यादित्वेन~~ने
ति पाठाभिप्रायेण विशेष्यज्ञानत्वादिनेति पाठे आदिना संबंधज्ञानत्वपरिग्रह इति

बोध्यं। तद्विशेषणकज्ञानत्वस्यैव तद्विशेष्यकज्ञानत्वादेरपि क्वाचित्कसहचारसंभवेन विशे
ष्यादिज्ञानजन्यत्वानुमितेरपि संभवादिति भावः एतेनेत्यादिवक्ष्यमाणरीत्या बाधे सा
हचीधितो मानाभावेन चेति निर्विकल्पकसिद्धौ विशेषणज्ञानत्वेन हेतुतासिद्धिः। तत्सि
द्धौ च तर्कावतारान्निर्विकल्पकसिद्धिरित्यस्मोऽप्याशयेनेत्यर्थः तथा च बाधस्तोक्तगति
बंधुरसेऽपि न क्षतिरित्याह एतेनेति परास्ताभित्यग्रिमेणान्वयः व्याख्यायां मानाभावेन
उक्तरूपमानाभावेन धीधितौ विशेष्यज्ञानमपि विशेष्यादिज्ञानमपि व्याख्यायां विशेष्य
त्वादिति इदमुपलक्षणं अतीतानागतसंबंधस्य संसर्गत्वादित्यपि द्रष्टव्यं। ननु ज्ञा
नस्य च सामान्यलक्षणजन्यातीतानागतविशेष्यादिविषयकज्ञानस्य च विशेष्यज्ञा राम
नं विशेष्यादिज्ञानं अज्ञातेति तथा च सामान्यलक्षणजन्यतावच्छेदकं सामान्यप्रका ३५
रकतद्धर्माश्रयविषयकप्रत्यक्षत्वं न तु सामान्यप्रकारतानिरूपिततद्धर्माश्रयविषयता
कज्ञस्य प्रत्यक्षत्वमिति भावः एतादृशेति विश्वगोचरज्ञानवत्त्वरूपेत्यर्थः। क्षतिविरहइति

तथाचसर्वस्यापात्माश्रयापत्तिरिभावः संशयानुपपत्तिरिति। स्वरूपतो घटत्वादिनिश्च
यसत्वादितिभावः प्रतिबंधादितिप्रतिबध्यतावच्छेदकं च निश्चयात्मकत्वं तद्व्यक्तित्व
मितिभावः। एतेन दूरत्वादिदोषस्य प्रतिबध्यतावच्छेदकं न तन्निश्चयत्वमार्थसमा
जग्रस्तत्वात्। नापि तद्विशिष्टधीत्वं संशयस्यैवानुपपत्तेरिति परास्तं। सामग्रीतिस्व
रूपतो निखिलजातिधीरूपसामग्रीत्वर्थः। ननु घटत्वेऽपि तद्व्यक्तिधर्मावगाहनेकथं
घटत्वांशेऽप्रकारकघटत्वप्रकारकज्ञानापत्तिरत आह। अन्यथेति। अयंभावः
स्वरूपतो घटत्वप्रकारकत्वेन घटत्वांशेऽप्रकारकघटत्वप्रकारकत्वं तथासति
जातिमान् घट इति प्रत्यक्षस्य तत्त्वानुपपत्तेर्योगिनां सार्वज्ञ्यानुपपत्तेश्च किंतु घ
टत्वनिष्ठनिरवच्छिन्नप्रकारताकत्वं तथा च यथा जातित्वप्रकारकज्ञानस्य स्वरूप
तो घटत्वज्ञानस्य च सत्वेन जातिमान्घट इति प्रत्यक्षस्य घटत्वनिष्ठजातित्वाव
च्छिन्ननिरवच्छिन्नप्रकारताद्वयशालितया स्वरूपतो घटत्वप्रकारकत्वं यथान्वयोग।

जधर्मे जन्यप्रत्यक्षे घटत्वादिवृत्तिधर्मे ज्ञानसत्त्वेन स्वरूपतो घटत्वादिज्ञानसत्त्वेन चाव
च्छिन्नावच्छिन्नप्रकारताद्वयशालितया स्वरूपतो घटत्वादिप्रकारकतया योगिनां सा
र्वज्ञ्यं तथा सामान्यलक्षणया जन्यप्रत्यक्षे सामग्रीसत्त्वेन प्रकारताद्वयसत्त्वेन स्वरूप
तो घटत्वादिप्रकारकतया निरुक्तसार्वज्ञ्यापत्तिरीश्वरस्येव हरेरेवेति। दिगिति। दिगर्थस्तु सा
मान्यलक्षणया निर्विकल्पकजनकत्वमेव समीचीनं तत्तद्घटादिज्ञानरूपोपनायक
ज्ञानजन्यतावच्छेदककोटौ सामान्यलक्षणाजन्यप्रत्यक्षे व्यभिचारवारणाय घट
त्वाद्यप्रकारकत्वानिवेशेन लाघवात्। सामान्यलक्षणया निर्विकल्पकजनने व्यभि
चाराभावात्। न च तन्निर्विकल्पक एव व्यभिचार इति वाच्यं अवच्छिन्नविषयतायाः ज्ञा
नलक्षणजन्यतावच्छेदककोटौ निवेशात्। न च यत्र प्रमेयत्वादिसामान्यलक्षण
या प्रमेयत्वाद्याश्रयघटवत्प्रमेयगोचरं निर्विकल्पकं जनितं तत्र सार्वज्ञ्यापत्तिरिति
वाच्यं। प्रमेयत्वादिसामान्यलक्षणया निर्विकल्पकानंगीकारात् घटत्वादिसामा

न्यलक्षणयैव निर्विकल्पकोत्पत्तिस्वीकारात् । न च विनिगमनाविरहः सार्वत्र्यापत्तेरेव वि
निगमकत्वात् । न च तत्र घटादिज्ञानरूपोपनायकज्ञानकारणतायां व्यभिचार इति
वाच्यं । उपनायकज्ञानकार्यतावच्छेदककोटौ प्रमेयत्वाद्यप्रकारकत्वनिवेशनात् । त
स्या सामान्यलक्षणयापि निर्विकल्पकस्वीकारे तु उपनायकज्ञानकार्यतावच्छेदकको
टौ घटत्वाद्यप्रकारकत्वानिवेशेन लाघवात् सामान्यलक्षणातो निर्विकल्पकस्वीका
र एव समीचीनः । दीधितौ तज्जनकत्वे इति पाठे तु शब्दसूचितास्वरसोऽप्यस्येवेति । त
द्विशेष्यज्ञानव्यक्तिविशेषणज्ञानं तु बाधकाभावात् । कारणमेवेति भावः । दीधितौ
निरस्तमिति । यत्तु विशेषणज्ञानहेतुत्वे ज्ञानलक्षणायाः स्वातंत्र्येण कारणत्वं न
कल्प्यत इति लाघवाद्विशेषणज्ञानहेतुत्वमिति तदसत् तावतापि विशिष्टप्रत्यक्ष
त्वस्यैव विशेषणज्ञानजन्यतावच्छेदकत्वसंभवेनानुमित्यादावपूर्वव्यक्तिभानानुरो
धेन सामान्यलक्षणासिद्धेरसंभवात् ॥ ॥ इति श्रीमन्महादेवविरचिते भवानं